CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 646

Title Ākhyātavāda Ṭīkā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 646 Subject : Vaiśeṣika

Title : Ākhyātavāda Ṭīkā

Author : - Scribe : Raghudeva

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 10" by 3.9" Extent : 28 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : —.

३३
२८
५५ ४
५५
६२४
६०

आख्यात-टी॰ श्रीगणेशाय नमः ॥ प्रणम्य नीरदश्यामं मुकुन्दं गुणमन्दिरं ॥ आख्यातवादसंख्याख्या रघुदेवेन तन्यते ॥१॥ नैय्यायिकः परमतं
निराकृत्य स्वमतं व्यवस्थापयति । आख्यातस्य तिङ् यत्नो वाच्यः । यत्नत्वविशिष्टो वाच्यः । यत्नत्वं शक्यतावच्छेदकमिति यावत् । य
थाकृते यत्नस्य व्यापारोऽन्तर्भूतत्वेन व्यापारशक्ति... वादमतयत्नेऽवच्छेदप्रतीतेः । शक्यतावच्छेदकं ... आख्यातत्वेन त्वरूढिसंबंधेनैवा
ख्यातपदवत्त्वे । यदि त्व रूढिसंबंधेन आख्यातपदवत्त्वं लकारेष्वपि युक्तं न तत्रैव आख्यातपदप्रयोगता । तथा च पचन्तित्यादौ
व्युत्पत्तिर्वाचोपस्थितत्वात् अपि लकारस्यानेशत्रादेशेन रूढिसंबंधेनाख्यातपदवत्त्वे लकारस्य सत्वादिति विभाव्यते । तदा विशि
ष्यतिस्त्यादिकमेव शक्यतावच्छेदकं बोध्यं । एतेन दश लकारसाधारणं लत्वमेव शक्यतावच्छेदकमिति परास्तं । तस्याख्याना
त् । नाप्येवं पचन्निलादावपि कृतिबोधप्रसंगादिति । तथा च यत्नत्वावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति यत्नत्वाव
च्छिन्नविशेष्यकरूढिसंबंध घटितआख्यातपदवत्तावच्छिन्ननिरूपितशक्तिविषयकज्ञानजन्ययत्नोपस्थितित्वेन हेतुत्वं क
ल्पनीयमिति ध्येयं । न तु प्रदर्शितकार्यकारणभावकल्पने मुख्याख्यातपदात् यत्नविषयकशाब्दबोधापत्तिरिति चेत् । सेन
वत्त्वेवं यदि पाकानुकूलयत्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तिवादिपदनिष्ठपचादिघालव्यवहितोत्तरत्वरूपानुपूर्वी
ज्ञानस्य हेतुत्वं न कल्प्यते । वस्तुतः मुख्याख्यातपदात् यत्नोपस्थितिकाले पाको यत्नश्चेति निराकांक्षबोधाख्यातपाकानुकूलय राम ॥१॥

त्नविषयकशाब्दबोधवारणाय तादृशकार्य[redacted]कारणभावकल्पनाया आवश्यकत्वेनोपदर्शितारव्यातपदनिरूपितश
क्तिज्ञानजन्ययत्नोपस्थितिसाध्यत्वशाब्दबोधेजननीये पचतीत्याद्यानुपूर्वीज्ञानस्य सहकारित्वकल्पनेनैव केवलाख्यात
पदात् यत्नविषयकशाब्दबोधवारणसंभवात् । केचित्तु आख्यातस्य यत्नवाचकत्वे पाकगोचरे निरस्तो यत्न... काले चै
त्रः पचतीति प्रयोगस्यायोग्यतापत्तिमुद्भावयंति । तन्न अदृष्टमहिम्ना हस्तमावातिरिक्तनिवृत्तो यत्ने मानाभावात् ।
वस्तुतस्तु निवृत्तो यत्ने अंगीकारेऽपि न क्षतिः । यतः पचतीत्यादिवाक्यात् पाकानुकूलकृतेरेव शाब्दबोधोत्सत्ता निरस्ता
ख्ययत्नकाले पाकानुकूलकृतेरभावेन तत्र ... दानीं तादृशप्रयोगस्य तथाविधप्रमालेकबोधाजनकतया योग्यत्वं संपा
दनीयेति । यत्तु प्रदर्शितापत्तिभिया प्रवृत्तित्वमेवाख्यातपदशक्यतावच्छेदकमुपवर्णयंति तेषां मते इष्टसाधनताज्ञानज
न्यतावच्छेदककोटिप्रविष्टत्वेन सिद्धायाः प्रवृत्तित्वजातेरीश्वरीयकृतिसाधारणत्वे मानाभावेनेश्वरो करोतीत्यादौ टे॰ २७
बोधानिर्वाहः । परिचिंतनीयमत्र । तत्र आख्यातस्य कृतौ लक्षणया नानुपपत्तिरिति वाच्यं । दर्शितरीत्या तादृशक-
जन्यतावच्छेदकस्यैव निर्वाहे लक्षणाकल्पनायाः अन्याय्यत्वात् । न च आख्यातस्य यत्नत्वविशिष्टशक्तत्वे रथः पचतीत्यादि
वदीश्वरः पचतीत्यादिप्रयोगापत्तिवारणाय अवश्यमाख्यातस्य प्रवृत्तित्वविशिष्टे शक्तत्वमुपगंतव्यमिति वाच्यं । आ

ता० पचतीत्यादिप्रयोगवत्तस्यापि वारणसंभवात्। तथा हि। आख्यातस्य यत्नत्वे ... कत्वे आख्या...
गापत्तेरित्यत्र तथाविधप्रयोगशब्दार्थस्तथाविधशब्दो बाधितः तथाविधशब्दजन्यप्रमात्मकबोधाभावात् ...
ख्यातादिरूपशब्दकारणसत्वेन तथाविधशाब्दबुद्ध्यापत्तेः। नानुपपत्तिः। तथाविधशाब्दबोधस्य आपादकाभावात्। योग्यताज्ञान...
बाधादकमिति तु नाशंकनीयं। यतस्तथाविधशाब्दबोधाप्रसिद्ध्या तादृशशाब्दबोधं प्रति तादृशयोग्यताज्ञानत्वेन हेतुत्वक
ल्पनस्यानिष्प्रयोजनत्वात्। ननु पाकानुकूलकृतिमांश्चैत्र इत्यादिशाब्दबोधं प्रति तत्समानाकारयोग्यताज्ञानस्य धर्मि
तावच्छेदकभेदेन हेतुत्वकल्पने गौरवात् समानधर्मितावच्छेदकतायत्वासत्वेव तथाविधयोग्यताज्ञानशाब्दबोधयो
र्हेतुहेतुमद्भावः। तथा च पाकानुकूलकृतिप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन शाब्दबोधत्वावच्छिन्नं प्रति ता५
पाकानुकूलकृतिप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन ज्ञानत्वेन हेतुत्वमिति योग्यताज्ञानशाब्दबोधयोर्हेतु
हेतुमद्भावे स्थिते तादृशसंबंधेन पाकानुकूलकृतिज्ञानस्यात्मत्वेसत्वात् तादृशबोधापत्तौ क्रियमाणायां फलतः पा
कानुकूलकृतिमान् आत्मेति शाब्दबोधापत्तिरिति तु माशंकिष्ठाः। आत्मा आत्मेत्याकारकशाब्दबोधवारणायात्मत्वान्य राम
वृत्तिविषयतासंबंधेन ... शाब्दबुद्धित्वावच्छिन्नं प्रत्यात्मभेदस्य हेतुत्वकल्पनस्यावश्यकतया योग्यताज्ञानेन पाकानु ॥२॥

त१

ता५

कूल कृतिप्रकारतानिरूपितविशेष्यतावच्छेदकताकसंबंधेन शाब्दबोधजननीये आत्मत्वभेदस्यापि सहकारित्वाभ्युपगमा
त्। ईश्वर ईश्वर इति शाब्दबोधवारणाय ईश्वरत्वान्यवृत्तिविषयतासंबंधेन शाब्दबोधत्वावच्छिन्नं प्रति ईश्वरान्यत्वेन हेतुत्व
कल्पनाया आवश्यकत्वात् पाकानुकूलकृतिप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन योग्यताज्ञानेन तथाविधशाब्दबोधे
जननीये ईश्वरत्वभेदस्य सहकारित्वाभ्युपगमेन ईश्वरः पचतीति वाक्यजन्यतादृशशाब्दबोधापत्तिवारणस्यापि सुलभत्वात्
अवच्छेदकतासंबंधावच्छिन्नतादृशप्रकारताकशाब्दबोधं प्रति तथाविधयोग्यताज्ञानस्य हेतुतायाः कल्पनीयतया आ
त्मा पचतीत्यादौ विशेषदर्शिनां तादृशयोग्यताज्ञानविरहेण तथाविधप्रमात्मकशाब्दबोधापत्तेरशक्यत्वात्। एवं चेश्वरः पच
तीति वाक्यजन्यतादृशशाब्दबोधापत्तिवारणस्यापि सुलभत्वात्। नन्वेवं सतीश्वरो वेदं करोतीति प्रयोगो दोषाय तु [redacted] पपत्तेरी
श्वरेऽवच्छेदकतासंबंधेन कृतेतरभावादिति चेन्न। तत्र समवायसंबंधेन कृतिप्रकारकशाब्दप्रतीतितथाविधानुपूर्वीज्ञानस्य हे
बोध: तुत्वकल्पनादीश्वरः पचतीत्यादितः तथाविधशाब्दस्यानुत्पादेन तथाकल्पनाया असंभवात्। कर्तृत्वस्य आख्यातार्थत्वे पचतीश्वरः पच
तीत्यादिजन्यतथाविधबोधोपपादनाय पक्षिमंगीकुर्वतीत्यलमधिकेनेति। ननु यत्नत्वे किं विशिष्टमाख्यातपदस्य शक्यं किं प्रमाण
मत आह। पचतीत्यादि। करोतीत्यनंतरं कर्मणीति शेषः। सर्वाख्यातविवरणादिति। इत्थं च कारणमधिकृत्य नादित्वार्थः। प्र

आख्यातवा॰ टी॰ ॥३॥

ना

वेत्युच्चरितवाक्यस्योत्तरवाक्यार्थकथनं विवरणमिदं स्य तल्लक्षणत्वमिति भावः। ननु कथं विवरणस्य शक्तिग्राहकत्वं। शब्द
विधया अनुमानविधया वा। नाद्यः। पाकं करोतीत्यादिविवरणस्य पाकविषयकयत्नमात्रबोधकत्वेन यत्ने आख्यात [redacted]
शक्तत्वबोधकतमात्रतस्य शक्तिग्राहकशब्दविधया प्रमाणत्वासंभवात्। नान्त्यः। साध्यहेतुप्रयोगासंभवात्। इति चेन्न। आख्या
तपदं यत्नत्वविशिष्टे शक्तं बोधकं विना यत्नत्वविशिष्टार्थकं करोतिप्रतिपादितार्थकत्वात् पाकत्वविशिष्टशक्तपाकपद
प्रतिपादितार्थकपचधातुवत् यद्विशिष्टार्थबोधकपदप्रतिपादितार्थकत्वं तत्र शक्तमिति सामान्यव्याप्त्या विवरणस्यापि श
क्तिग्राहकत्वसंभवात्। ननु परदर्शितानुमानमप्रयोजकमत आह। व्यवहारादिवेति। वाचकं विना। अनन्यलभ्यत्वप्रति
संधानं विना इदं तु धर्मिणि आख्यातस्य शक्तिव्यवच्छेदार्थमुक्तं। वृत्त्यन्तरेति। शक्तिग्रहसंभवादित्यर्थः। तथा च विवर
णहेतुकानुमानस्य शक्तिग्राहकत्वे तुल्ययुक्त्या व्यवहारहेतुकानुमानस्यापि शक्तिग्राहकतया घटत्वादिविशिष्टबोधकघटा
दिपदादेरपि शक्तिविलोपप्रसंग इति भावः। ननु विवरणं तत्रैव शक्तिग्राहकं यत्रानन्यलभ्यताप्रतिसंधानं तथापि प्रकृ
ते तु पाकोऽयत्नजन्यः पाकत्वादित्यनुमानादपि यत्नस्य लाभसंभवेनानन्यलभ्यता तत्र अनन्यलभ्यस्याप्याख्यातपदशक्य राम
त्वे किमपराद्धं धर्मिणेत्यत आह। किं करोतीत्यादि। यत्नप्रश्ने। यत्नत्वविशिष्टे जिज्ञासितसंबंधबोधकतात्पर्ययोगाय ॥३॥

चतीति तु तरस्य। उत्तरकालमाविपचतीति वाक्ये उपदर्शितप्रश्ननिवर्तकत्वस्य यत्नार्थकत्वं विना। यत्नत्वविशिष्टे पाकसंबं
धबोधं विना। अयं भावः। यद्धर्मविशिष्टे यद्धर्मविशिष्टस्य संबंधः। यत्प्रश्नवाक्यात् प्रतीयते तद्धर्मविशिष्टे तद्धर्मिण्या प्र
धर्मावच्छिन्नसंबंधश्चेत् तदुत्तरवाक्यात् प्रतीयते तदा तदुत्तरवाक्यं तत्प्रश्ननिवर्तकं भवति। यथा घटत्वविशिष्टे जिज्ञा
सितसंबंधबोधकेन कस्मात् घट इति प्रश्ने घटत्वविशिष्टे दंडजन्यत्वबोधकदंडात् घट इत्युत्तरवाक्यं निवर्तकं संप्रकृते
चाख्यातस्य यत्नत्वविशिष्टे बाधकत्वे व्यापारशक्त्या पचतीति वाक्यात् पाकानुकूलव्यापारबोधाभ्युपगमे यत्नत्ववि
शिष्टे पाकसंबंधबोधाभावात् तदुत्तरवाक्यस्य यत्नत्वविशिष्टे जिज्ञासितसंबंधबोधकं किं करोतीति प्रश्नवाक्यनिवर्तक
त्वानुपपत्तिः। अन्यलभ्यत्वेऽप्याख्यातस्य यत्नबोधकत्वसंभवेन व्यापारे शक्तिरावश्यकीत्यत आह। अचेतन इति। अचे
तनार्थमुख्यविशेष्यकबोधजनकेत्यर्थः। यत्नत्वविशिष्टे शक्तिरावश्यकीति। ननु रथो गच्छतीत्यादौ आख्यातस्यार्थः। अनु
कूलव्यापार इति। अत्रानुकूलत्वं किंतिनेनु [illegible] गमनस्यतेनेसंबंधेन व्यापारे अन्वयस्फोरणाय न तु तदंतर्भावेन। वि
लक्षणीयता अर्थत्वात्। तत्र गमनस्यान्वये पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्तिविरोधाच्च। तत्र व्यापा
रे [redacted] लक्षणवादिमतं दूषयति। अन्यदीयेति। रथगमनानुकूलनोदनाख्यसंयोगादिमान् निश्चलपुरुषे अयं पुरुषो

आख्या॰ टीका ॥७॥

गच्छतीत्यप्रयोगादित्यर्थः। तथा चाख्यातस्य व्यापारवाचित्वलक्षणमते तादृशनिश्चलपुरुषेऽपि गमनानुकूलनोदनाख्य
संयोगादिरूपव्यापारवत्त्वे पुरुषो गच्छतीत्यादिप्रयोगापत्तिरिति भावः। ननु तादृशपुरुषे तथाविधप्रयोगापत्तिर्नाम
तथाविधवाक्यजन्यप्रमात्मकबोधापत्तिः सा च तादृशपुरुषस्य निश्चलतादशायामुच्यते अन्यदा वा अस्त्येवेष्टाप
त्तिः आद्ये तत्तन्मौलिकेन तादृशशाब्दबोधाप्रसिद्ध्याऽप्रसक्तसंभवः इत्यत आह। स्यो गच्छतीत्यादाविति। केचित्तु सामाना
धिकरण्यसंबंधेन वर्त्तमानगमनविशिष्टे आख्यातस्य लक्षणाकल्पनान्नोपदर्शितापत्तिरित्यत आह। गच्छतीत्यादीत्या
हुः। स्यतिव्यापारयोरित्यादि। क्वचित् हृतिवाच्यव्यापारलक्षणाकल्पनागौरवात् क्वचिद्धृतिव्यापारयोर्बोधेन स्तु
व्यापारयोः प्रतीत्यसंभवादित्यर्थः। ननु जानातीत्यादावाश्रयत्वे आख्यातस्य लक्षणाकल्पने चैत्रोऽयं घटं जानातीति
प्रयोगकाले घटज्ञानवति मैत्रे मैत्रो घटं जानातीति प्रयोगापत्तिः एककालीनत्वसंबंधावच्छिन्नतदाश्रयत्वस्य तदा
नीं मैत्रेऽपि सत्त्वात् तत्तत्संबंधावच्छिन्नाश्रयत्वे लक्षणाकल्पने पुनरतीवगौरवं तदपेक्षया व्यापारे लक्षणाकल्पन
मेव न्याय्यमित्यतिप्रसंगस्य तत्प्रदर्शितत्वात् तरीत्या कारणीयता त्वयदि चाख्यातस्याश्रयत्वे तेन आश्रयत्वसामान्ये लक्षणा जा राम ॥७॥
नातीत्यादौ चाश्रयत्वं रूपेण समवायसंबंधावच्छिन्नाश्रयत्वस्यैव बोधात् तथैव कार्यकारणभावकल्पनाच्च नापि व्याप
त

रलक्षणापेक्षया गौरवापत्तेरित्यत आह। गत्यादिमत्त्वेति। आदिना ज्ञानादिपरिग्रहः। मात्रपदेन व्यापारपरिच्छेदः। तथा चानु
मानानुरोधेन गत्यानुकूलसंबंधावच्छिन्नाश्रयत्वे लक्षणा न तथाविधगुरुतरकार्यकारणभावो वा कल्प्यत इति भावः। केचित्तु पद नन्द
र्शितस्थले तु व्यापारस्य वाश्रयत्वस्याप्यप्रतीतेः कुतं तत्र लक्षणेत्यत आह। गत्यादिमत्त्वेतीत्याहुः। ननु आख्यातस्य मुख्यार्थबा
धस्य लत्वं तत्र लक्षणा न संभवति घटो नश्यतीत्यादौ नश्यतीत्यसंभवात् घटस्य नष्टत्वेन नाशाश्रयत्वाभावात्। प्रतियोगिता
संबंधेन नाशत्वावच्छिन्नं प्रति प्रतियोगिनस्तादात्म्येन संबंधेन हेतुत्वानुरोधेन नष्टस्यापि प्रतियोगितासंबंधेन नाशाश्र
यत्वांगीकारे पुनर्लाघवात् प्रतियोगित्व एव लक्षणाकल्पनाया उचितत्वादित्यत आह। नश्यतीत्यादाविति। निरूढेति। अ
नादिसिद्धेत्यर्थः। ननु प्रदर्शितबहुप्रयोगसत्त्वे तत्र शक्तिरेवास्त्विति न कल्प्यत इति चेत्। यत्नत्वरूपलघुशक्यतावच्छेद
कसंभवे तत्तत्संबंधघटिताश्रयत्वत्वावच्छिन्ने शक्तिकल्पने गौरवज्ञानरूपप्रतिबंधकस्य जलांजलिः प्रसज्येत। न च आश्रय
त्वत्वस्यातिरिक्तत्वमभ्युपेत्य तदवच्छिन्ने शक्तिकल्पने बाधकाभाव इति वाच्यं तर्हि व्यापारत्वमप्यतिरिक्तमभ्युपेत्य तदव
च्छिन्नेऽपि शक्तिकल्पनस्यौचित्यात् न चेष्टापत्तिः तथा सति विनिगमकाभावात् तत्तद्धर्मावच्छिन्ने शक्तिकल्पनामपे
क्ष्य लाघवात् कृत्सप्रयत्नत्वावच्छिन्न एवाख्यातस्य शक्तिकल्पने बाधकाभावात्। एतेन समवायत्वमतिरिक्तं स्वीकृत्य तदवच्छि

आख्यातवादटी० न्ये आख्यातस्य शक्तिः अन्यत्र लक्षणेत्यपास्तं। उपदर्शितविनिगमनाविरहेण तत्तद्गन्तव्यधर्मावच्छिन्ने शक्तिकल्पनाप्रयु
॥५॥ क्तगौरवस्यनागरूकत्वादित्यधिकमग्रेवक्ष्यामः। ननु चैत्रो जानातीत्यादावाश्रयत्वे निरूढलक्षणाकल्पने निरर्थकमेवातत्रा
श्रयतासंबंधेन चैत्रे ज्ञानरूपधात्वर्थस्यान्वयेनैवोपदर्शितानुभवोपपत्तेः। तत्राश्रयत्वप्रकारकानुभवस्त्वसिद्ध एवेति चिं
तामणिकारमते दूषणमाह। चैत्रः पचतीत्यादि। अन्वयमात्रेत्यादि इति। चैत्रः पचति तंडुलमित्यादौ कर्मतासंबंधेन पाके तंडुलस्य
मैत्रः पच्यते तंडुल इत्यत्र पाके कर्तृतासंबंधेन मैत्रस्यानुभवाभावादित्यर्थः। धात्वर्थप्रातिपदिकार्थयोरिति। धात्वर्थनामार्थयोरभे
दातिरिक्तसाक्षात्संबंधेनान्वयबोधस्याव्युत्पन्नतयेत्यर्थः। अत्र स्तोकं पचतीत्यादावभेदसंबंधेन धात्वर्थे नामार्थस्तोकस्यान्व
यानव्युत्पत्तिभंग अतो भेदातिरिक्तेति। ननु तत्र विशेषणविभक्तेरेवाभेदोऽर्थः तत्रैव च स्तोकस्यान्वयोऽभ्युपेयते। तथा च तत्रा
भेदातिरिक्तत्वविशेषणानुपादानेपि न दोषः। नामार्थप्रत्ययार्थयोरेवान्वयबोधस्य तत्रोत्पन्नत्वादिति चेत्। सत्यं। विशेषणवि
मेरा भक्तेः साधुत्वे नोर्थ[redacted]कत्वासंभवात्। तस्याभेदार्थकत्वेपि लुप्तविभक्तिमननुसंदधानस्य स्तोकं पाक इत्यादावभेदसंबं
धेन पाके स्तोकान्वयबोधस्यानुभवसिद्धतया तत्र भेदातिरिक्तत्वविशेषणाव्यावृत्तिहानसंभवात्। न च लुप्तविभक्तेरनुसंधा
नं विनाशाब्दबोधानंगीकारे तु गते राजपुरुष इत्यादौ राजपदस्य राजसंबंधिनि लक्षणया तत्रापि तथाबोधस्याक्षतत्वादिति। तेदु राम
॥५॥

लं पचतीत्यादौ पाके तंडुलकर्मत्वस्येव कर्मतासंबंधेन तंडुलस्यापि बोधोत्पत्तेस्तत्र व्युत्पत्तिभंगवारणाय साक्षादिति। नामार्थधात्वर्थयोर्भ
यान्वितविभक्त्यर्थातिरिक्तेत्यर्थः। ननु तथापि न कलंजं भक्षयेदित्यत्र विध्यर्थबलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वान्वितनञर्थ
भावस्य धात्वर्थकलंजभक्षणादावन्वयात्तत्र तद्व्युत्पत्तिभंगोऽशक्यपरीहार इति चेत्। निपातातिरिक्तत्वमपि नाम्नि विशेषणीयं। स्तो
कं रूपो वा नञ्पदस्याभाववति लक्षणा। तस्याभेदसंबंधेन तत्र धात्वर्थेऽन्वय इति। संबंधमर्यादयेत्यादि। चैत्रो जानातीत्यादौ धात्व
र्थनामार्थयोः संसर्गमर्यादया आश्रयत्वस्य भानासंभवादित्यर्थः। तथा चैतादृशव्युत्पत्त्यनुरोधेन नामार्थनिष्ठाभेदातिरिक्तसं
बंधावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितवृत्तिज्ञानजन्योप
स्थितेः प्रकारतासंबंधेन हेतुत्वं कल्पनीयं। एवं च धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन शाब्दबुद्धित्वावच्छिन्नं तो५
प्रत्यपीति न चैत्रो जानातीत्यादावाश्रयतासंबंधेन धात्वर्थज्ञानस्य नामार्थेऽन्वयबोधः संभवतीति भावः। अत्र चिंतामणिकारम
तानुयायिनः। चैत्रः पचति तंडुलमित्यादौ कर्मतासंबंधेन तंडुलस्य पाकेऽन्वयबोधवारणाय नामार्थनिष्ठत्वधात्वर्थप्रकारता
निरूपितविशेष्यतावच्छेदकसंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति विभक्तिपदनिरूपितशक्तिज्ञानजन्योपस्थितेः प्रकारतासंबं
धेन हेतुत्वकल्पनमस्तु धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति तथाविधोपस्थि

आख्यात.टी. तेर्हि तु लक्षकल्पने तु निष्प्रामाणिकतया कादरणीयमानत्वाच्चैत्रो जानातीत्यादौ आश्रयतासंबंधेन धात्वर्थस्य नामार्थेऽन्वयबोधे
॥५८॥ बाधकाभावादाश्रयत्वेऽस्य आख्यातस्य निरूढलक्षणाकल्पनं किमिति न जानीमहे। नन्वाख्यातस्याश्रयत्वे लक्षणानंगीकारे जानातीत्या
दावाश्रयत्वप्रकारकबोधानुभवापलाप इति चेत्। प्रायः स्वभावानुभवबलात्तथा बाधकमुद्भावयसीत्याहुः। अत्र विवदंति बहवः
जानातीत्यादावाख्यातस्य घटादौ स्वारसिकलक्षणा ज्ञानकाले ज्ञानीयो घटादिरिति शाब्दबोधोपपत्त्यर्थं घटादिविशेष्यकज्ञा
नप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति ज्ञाधातुसमभिव्याहृताख्यातज्ञानजन्यपदार्थोपस्थितेर्हेतुत्वकल्पने घटत्वपटत्वादिनेदना
नंतकार्यकारणभावकल्पनापत्तेर्गौरवात्तदपेक्षया तदनिवेश्य ज्ञाननिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकसंबंधेन शा ताः
ब्दबुद्धित्वावच्छिन्नं प्रत्याख्यातपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वकल्पनेनन्यायसीत्तथाच
तादृशानंतकार्यकारणभावाकल्पनं चैत्रो जानातीत्यादावाश्रयतासंबंधेन चैत्रे ज्ञाधात्वर्थस्यान्वय इति तत्राख्यातस्याश्रयत्वे ल
क्षणावश्यकीति। यत्तु घटत्वपटत्वादिकमनिवेश्य तथाविधकार्यकारणभावकल्पने ज्ञानीयो घट इति योग्यताज्ञानबलात्त
थाविधाख्यातपदज्ञानजन्यपदार्थोपस्थितिदशायां ज्ञानीयो घट इति शाब्दबोधस्य समवायसंबंधेनात्मन्यापत्तिर्दुर्वारैवाय राम
दिच्चविशेष्यतावच्छेदकनिष्ठप्रत्यासत्त्या शाब्दबुद्धियोग्यताज्ञानयोरपि कार्यकारणभावः कल्प्यते। तथापि भिन्नविषयका ॥५८॥

भाव

नुमितिसामग्र्यां प्रत्यक्षकारणबलात्तदा तथाविधशाब्दबोधापत्तेः सन्निकृष्टे पिंडे समवायेन यत्र बलवत्त्वं घटत्वपटत्वादिकं निवे
श्य तथाविधसमभिव्याहारज्ञानजन्योपस्थितिशाब्दबोधयोः कार्यकारणभावकल्पनमिति किं बाधकं चैत्रो जानातीत्यादौ
चैत्रे आश्रयतासंबंधेन ज्ञानस्यान्वय इति। तन्न। उपदर्शितशाब्दबोधं प्रत्युपस्थित्योर्विषयभेदेन कार्यकारणभावक
विषय८नेष ल्पनेऽनंततद्विषयकेभ्यः सह विनिगमनाविरहेण कार्यकारणभावानंत्यात्कारणतावच्छेदकगौरवाच्च तदपेक्षया घटत्वादिवृत्ति
विषयतासंबंधेन ज्ञानत्वावच्छिन्नं प्रति घटत्वादिवृत्तिविषयितासंबंधेन ज्ञानत्वेन हेतुत्वांतरकल्पनस्य समभ्यर्हितत्वादापत्ते
रभावात्। तन्नाहि विरोधिसामग्र्यभावे न ज्ञानीयो घट इति शाब्दबोधजननीये ज्ञाधातुसमभिव्याहृताख्यातपदजन्योपस्थि
तिविशिष्टघटत्वप्रकारकज्ञानादेः सहकारित्वं कल्पनीयं। घटत्वप्रकारकज्ञाने तथाविधोपस्थितिवैशिष्ट्यं च प्रकारतासंबंधेन
यत्राधिकरणे तन्निरूपितविषयतासंबंधावच्छिन्नवृत्तित्वरूपसामानाधिकरण्यसंबंधेन तथा च तादृशाख्यातपदज्ञा
नजन्यघटाद्युपस्थितिकाले तथाविधसामानाधिकरण्यसंबंधेन तादृशाख्यातपदज्ञानजन्योपस्थितिविशिष्टघट
त्वज्ञानेन तत्स्वरूपसहकारिभावेन न विरोधिसामग्र्यभावरूपकारणबलात्तदानीं ज्ञानीयो घट इति शाब्दबोधापत्तिः। न
च तथापि पुरुषांतरस्याख्यातपदज्ञानजन्यघटोपस्थितिकाले पुरुषांतरात्मनि विरोधिसामग्र्यभावबलात् ज्ञानीयो घट इ
ति शाब्दबोधापत्तिर्दुर्वारैवेति वाच्यं। एककालीनसमवेतत्वसंबंधेनापत्तेर्वारणार्थं तत्कालसमवेतत्वावच्छिन्नं प्रति तादात्म्यसंबंधे

श्रा·टी· २ ॥(७१)

न तत्तद्रासत्वे नापि हेतुत्वस्यावश्यकतया तत्तत्पुरुषीयोपदर्शितास्याप्तपदज्ञानजन्योपस्थितिविशिष्टतत्तत्पुरुषीयपदज्ञा
ज्ञानत्वावच्छिन्नविशिष्टतत्तद्रासविशिष्टविरोधिसामग्र्यभावस्य ज्ञानीयोपदद्रतिशाब्दबोधसामग्रीत्वाभ्युपगमेन कार्यत्वानुप
नुपपत्त्यभावात्। घटत्वज्ञानत्वावच्छिन्नवैशिष्ट्यं तत्तद्रासनिष्ठैककालीनत्वसंबंधेन विरोधिसामग्र्यभावेन कार्यवैशिष्ट्य
वताद्रास्य विशेषणतोभयघटितसामानाधिकरण्यसंबंधेन बोध्यं। तथा च ज्ञानत्वावच्छिन्नप्रकारतानिरूपितविशेष्य
तावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रतिप्रकारतासंबंधेन तथाविधाख्यातपदजन्योपस्थितेर्हेतुत्वस्य निर्दुष्ट
तया तादृशहेत्वभावात्। चैत्रो जानातीत्यादौ चैत्राश्रयतासंबंधेन ज्ञानान्वयबोधासंभवेन तदाख्यातपदस्याश्रयत्वे
लक्षणा आवश्यकीतिसारम्। केचित्तु चैत्रो जानातीत्यादौ चैत्राश्रयतासंबंधेन ज्ञानान्वयाभ्युपगमे प्रस्थितमाख्यातं
स्यकृतिशक्त्यापि स्वेजगत्पचतीत्यादावपि स्वानुकूलकृतिमत्त्वसंबंधेन चैत्रे पाकान्वयबोधस्य च कृत्युचितत्वात्। यदि च
धात्वर्थस्य नामार्थेऽन्वयोऽव्युत्पन्न इति तथाविधबोधस्यासंभवेनाख्यातस्य कृतिशक्तिरावश्यकीति विभाव्यते तदा जा
नातीत्यादावपि आश्रयत्वे लक्षणाकल्पनमावश्यकमित्याहुः। न च प्रवृत्तिनिवृत्तिरणादिवत्स्वादाख्यातस्य यत्नवाचकत्वे
तदैवाख्यातार्थकृतेर्मत्वर्थीयत्वान्तरेणकृतत्वस्याधारत्वविशिष्टशक्तिकल्पने बाधकाभावादित्यत आह। कथमन्ये राम ॥(७१)

ति। क्रियाजन्यत्वेति। संयोगरूपव्यापारजन्यत्वप्रतिसंधाना विशिष्टबोधे व्यर्थः। तथा च कृष्यातो क्रीपारार्थकृत्येपदांकुरादौ व्यापा
रजन्यत्वप्रतिसंधानकालेकृतिजन्यत्वप्रतिसंधानाप्रतिसंधानाभ्यां घटः कृतः अंकुरो न कृत इति व्यवहारः सर्वानुभवसिद्धो
नस्यात्। तज्जन्येतदांकुरे व्यापारजन्यत्वज्ञानसत्वेन व्यापारजन्यत्वरूपस्य बहिर्व्याज्ञानाभावादिति भावः। कृधातोर्यत्नार्थ
कत्वे युक्त्यंतरमाह। ज्ञानादिवदिति। ज्ञाते सादौ यथा ज्ञ्याश्रयबोधकत्वपदसमभिव्याहृतज्ञाधातुपदात् ज्ञानाश्रयश्चैत्र
इति बोधः तद्वत्कृतेत्यादावपि आश्रयबोधकक्तप्रत्ययपदसमभिव्याहृतकृधातुपरात्क्तप्रत्ययाश्रय इति बोधस्तुल्यस्यैव। स च
कृधातोर्यत्नार्थकत्वं विना न संभवतीति तस्य यत्नार्थकत्वमावश्यकमिति भावः। द्रष्टव्यमन्ये बोध्यं। कृजादिपदस्यैकरूपैकवश
क्तिः। न चैवं पचादिपदस्य कृतौ शक्तिरंगीक्रियतामिति वाच्यं। तथा सति पक्तुश्चैत्र इत्यादौ चैत्रे कृत्याश्रयपदार्थकृतेः स
मवायसंबंधेनान्वयबोधासंभवात्। नामार्थधात्वर्थयोरिव नामार्थयोरप्यभेदातिरिक्तसंबंधेनान्वयबोधस्याव्युत्पन्न
त्वात्। अन्यथा घटः कर्मत्वमित्यादितः कर्मत्वादिरूपकर्मतावाधेयतासंबंधेन घटान्वयबोधप्रसंगात्। अत्र
च चौनामत्वेनासीतिविमर्शनाविनीयम्। स्यात्पचेत्स्वेनतस्यापि कामकत्वात्। तदाहुरभियुक्ताः आधेयतविहितनामेकमि रा २
ति। ज्ञाते सादौ तु कृते कृतौ नानुकूलत्वाभावेन ज्ञानानुकूलकृत्साश्रयबोधासंभवात्। सविषयत्वाच्चकथातु समभिव्याहारस्य

आख्या.टी. ॥८॥

लेतच्चाश्रयेलक्षणावश्यकी।ननुज्ञानेस्पोदेतचोलक्षणांगीकारेपिकर्त्तृत्वस्यतत्त्वतःशास्त्रेवकृसोऽस्मयपयोधोस्तुकिंतद्ध्याते
र्थेलक्षणेतिचेन्न।तथासतिकर्त्तृत्वमत्रधातुनैवव्याप्यापत्तेः।तस्याश्रयत्वेनतत्पदाख्यातव्यापारानुकूलत्वस्याश्रयइतिवोध्यापत्तेश्च
नचतत्रकृधातुपदेनाश्रयग्राहकमितिवाच्यम्।कृत्यर्थान्वितस्वार्थबोधकत्वस्यप्रत्ययानामितिव्युत्पत्तेरिति।ननुकर्त्तृपदा
त्कृत्साश्रयबोधस्थलेभवतिनैवकृत्योपलाक्षणिकत्वमायाति।तदेवनातत्पदात्क्रियाश्रयस्यतदनुकूलव्यापाराश्र
यस्यवाबोधस्थलेवांगीकारात्इत्यतआह।क्रियायाइति।कृधातोःक्रियार्थकत्वमभ्युपेत्यकर्त्तृपदात्क्रियाश्रयबोधांगी
कारेक्रियाश्रयमात्रेकर्त्तृव्यवहारःस्यात्।तस्यक्रियानुकूलव्यापारार्थकत्वमभ्युपेत्यकर्त्तृपदात्तादृशव्यापाराश्रयबोधांगी
कारेचकारकमात्रेकर्त्तृव्यवहारःस्यात्।कारकमात्रस्यैवतथाविधव्यापाराश्रयत्वादितिभावः।कृञोव्यापारशक्तिवादिनो
मांसकःप्रसक्तवतिष्ठते।अपीति।अंकुरःकृतइतिप्रयोगस्यकृञोयत्नार्थकत्वेपीश्वरकृतिमादायसंभवेनतस्यव्यापारा :
र्थकतासाधकतायोगादतआह।बीजादिनेति।तथाचकृञोव्यापारार्थकत्वेविनाबीजादिकरणकव्यापारजन्यःअंकुरइ
तिबोधजनकस्यबीजादिनाअंकुरःकृतइतिप्रयोगस्यासंभवात्तस्यतद्विधायकत्वमावश्यकमितिभावः।ननुत
थासतिकारकमात्रेकर्त्तृव्यवहारः।अतस्तत्परीहारइत्यतआह।कर्त्तृपदेचेति।अत्रषष्ठ्यर्थसप्तमीतस्याश्चघटकत्व राम ॥८॥

मर्थः।पदपदंचवाक्यपरं।तथाचकर्त्तृरूपवाक्यघटकस्यकृञइत्यर्थः।यदीति।वस्तुतःकारकमात्रस्यैवकर्त्तृपदार्थत्वे
सतितिविरहः।विवक्षातःकारकाणिभवंतीतिशाब्दिकवृत्तचेरवोधिसंगमगंगजनकत्वादितिभावः।ननुकृधातोरनंतसंयोग
विभागादिरूपव्यापारशक्तत्वापेक्षयालाघवात्यत्नेशक्तत्वमेवोचितमुपदर्शितस्थलेचव्यापारलक्षणांगीकारान्नानु
पपत्तिरितिचेन्न।बहुषुस्थलेषुतथाप्रयोगाभावेनतत्रशक्तिग्राहकाभावात्।अन्यथापशुपदात्लक्षणयाकदाचित्तथ
टबोधसंभवेनतस्यापितत्रशक्तिकल्पनास्यादितिनकिंचिदेतत्।कृधातोर्व्यापारवाचकत्वंव्यवस्थाप्यआख्यातस्या
पितद्वाचकत्वंव्यवस्थापयति।एवंचेति।कृधातोर्व्यापारशक्तत्वेकरोतीतिविवरणादर्थलत्वविशिष्टेआख्यातशक्तिकल्पक
त्वेनतुचेत्यर्थः।अचेतनेपीति।काष्ठादावपीत्यर्थः।वाचकेविनेति।व्यापारेआख्यातस्यशक्तिकल्पनेवाचकंविनेत्यर्थः।गौ
रवात्।यागादीति।व्यापारेआख्यातस्यलक्षणयाअन्याय्यत्वादित्यर्थः।जनकव्यापारइति।शक्यतावच्छेदककोटौजन
कत्वांशनिवेशस्तुपचनीयस्यादित्यादिवाक्यजन्यत्वा४कत्वेन।४द्बोध्येजनकत्वस्यप्रकारविधयाभानानुभवाविरोधायेति।तु
दर्थइति।आख्यातपदार्थैकदेशे।जनकत्वंगुरुजनकत्वमपेक्ष्यप्रकारकालवत्त्वमात्रंशक्यतावच्छेदककोटौनिवेशनी
यं।लाघवादतआह।तंदुलेति।तथाचोपदर्शितापत्तिवारणायगुरुत्वस्यापिनत्यागइतिकृतमात्रान्न्यायासिद्धनियमतया

आख्या॰टी॰
॥१॥

वैवर्त्तित्वरूपजनकत्वस्यैवाख्यातपदशक्यतावच्छेदकत्वे दोनिवेशनमुचितमिति भावः। तर्हीति आख्यातस्य यत्नत्व
विशिष्टवाचकत्वे इत्यर्थः। यत्नाविनाभूतत्वादिति। यत्नजन्यत्वव्याप्यो यः पाकादिक्रियाविशेषस्तद्धेतुत्वेनानुमानतः कार
णीभूतस्य यत्नस्यानुमानादित्यर्थः। अत्र पाकादिक्रियायां हेतुत्वोक्तिः चैत्रेण चैतन्यसमवधानस्य व्याप्यतावच्छेदकत्वमु
पेत्य तथा च पाकः यत्नजन्यः पाकादित्वादित्यनुमानात् पाके यत्नजन्यत्वसिद्धिकाले तुल्यवित्तिवेद्यतया यत्नेपि पाकज
नकत्वसिद्ध्या पचतीत्यादौ पाकजनकयत्नानुभवनिर्वाह इति भावः। नन्वाख्यातस्य व्यापारवाचकत्वे पचतीत्युत्तरं
पाकजनकयत्नवानिति विवरणं संगच्छते इत्यत आह। पचतीति। तादृशविवरणमिति। तादृशविषयीभूतार्थविव
रणमित्यर्थः। नत्वाख्यातार्थस्य यत्नत्वेन रूपेण तत्र प्रवृत्तिः प्रयोजकत्वेनैव तादृशार्थस्य बोधः संभवतस्य तादृशविवि
षयीभूतः प्रकृते च पचतीत्यादिवाक्यघटकीभूतपदात् वृत्त्या यत्नबोधे कथं न तत्तात्पर्यविषयत्वमिति का चोद्यम्। इ
त्येतिवाक्यस्य तत्प्रयोज्यानुमितिविषयीभूतवह्निरूपार्थकत्ववत् पचतीत्यादिवाक्यस्यापि तत्प्रयोज्यानुमितिवि
षयीभूतयत्नतात्पर्यकत्वसंभवात्। तात्पर्यं वा स्वाच्छन्द्यात् तदर्थबोधो भवति स्यादिवाक्येनापि तत्समानार्थकत्वं तस्य
प्रयोज्यत्वप्रकारकतदर्थबोधो न ती चेति। ननु विवरणस्य परंपराविषयीभूतार्थपरत्वकल्पने सर्वत्र तथा संभवे

राम
॥१॥

च नशक्तिग्राहकत्वमनुपपन्नं स्यात्। अत आह। अन्यथेति। अन्यत्वरूपार्थस्यापि विवरणं ग्राहकत्वकल्पने इत्यर्थः। तथा
चेयत्नान्यत्वस्य तन्नास्तितत्रैव विवरणस्य शक्तिग्राहकत्वमायास्यतीति भावः। एवमिति। तत्र पर्युदितानुमानेन पाक
जनकयत्नानुभवनिर्वाहेपि इत्यर्थः। यत्नस्येति। पाकजनकयत्नस्येत्यर्थः। ननु अनुमानादुपस्थितेन तद्विषयत्वेनात्
ख्यातोपस्थापितवर्त्तमानत्वस्यान्तरकालिकयाऽन्वयबोधो नस्तु पेयइत्यत आह। तस्येति अपरामर्शतात्। यदानुपस्थि
तत्वात्। तथा च पदानुपस्थितार्थस्य शाब्दबोधाविषयत्वनियमेन न पाकेऽस्यनेयाभ्युसंभवादिति भावः। ननु तत्र य
त्नबोधकपदमध्याहार्यं न पाठेन्यकोप्योऽन्वीकार्य इत्यत आह। अन्यथेति। ज्ञानान्तरयोगघटितत्वादित्यर्थः। स्व
त्वन्ताद्वितिशाब्दबोधपरजन्यपदार्थोपस्थितेस्तादृशत्वार्थकारणानावस्थासिद्धत्वादित्यर्थः। तथा चेज्ञानान्तरी
यत्वादावथवले वर्त्तमानत्वान्वयवारणार्थं विशेष्यतावच्छेदकतासंबंधेन आश्रयत्वोपस्थापकाख्यातपदनिरूपितवृत्तिज्ञा
नजन्यत्वमानान्वयप्रकारकत्वान्वयबोधं प्रति प्रकारता संबंधेन तादृशधातुनिरूपितवृत्तिज्ञानजन्योपस्थितेर्हेतुत्वकल्पने
नरथो गच्छतीत्यादौ यत्नत्वे वर्त्तमानत्वान्वयवारणार्थं विशेष्यतावच्छेदकतासंबंधेन व्यापारोपस्थापकाख्यातपदनिरूपितवृ
त्तिज्ञानजन्यवर्त्तमानत्वप्रकारकत्वान्वयबोधं प्रति आख्यातपदनिरूपितवृत्तिज्ञानजन्योपस्थितेः प्रकारतासंबंधेन हेतुत्वकल्पने

आ॰ व्या॰ टी॰ ॥१०॥

पक्का॰१

नवतत्राप्याहतत्पदार्थघटितत्वेवर्तमानत्वान्वयबोधासंभवइति भावः। ननु व्यापारोपस्थापकत्वात् पदेअन्वयवर्तमानत्वप्रकारकशा
ब्दबोधप्रतियत्नेपरज्ञानोपस्थितेरपिविशेष्यतासंबंधेनातिरिक्तहेतुता [redacted] कल्पनान्योनुपपद्यते। नेत्याहेति चेत्। एतद्व
च्छिन्नातिरिक्तकार्यकारणभावकल्पनेपि सुघात्रापि आख्यातस्य यत्नत्वविशिष्टे स्वशक्तिकल्पनाया लघीयस्त्वात्। नन्वेवं कालः
पाकजनकवर्तमानयत्नानुभवोपपत्तिरिति रासक्वचिन्निराकरोतीति। नचेति। यत्नविगमेपीति। तत्पाकजन्मेनिचाराद्याग्निसहासे
भवेनतथाविधानुमितिर्नसंभवतीतिभावः। ननु तथाविधवर्तमानयत्नविशिष्टकालिकविशेषणतासंबंधेनतादृशव्याप
रस्यहेतुत्वमंगीकार्यमतोनोक्तानुपपत्तिरित्यत आह। धर्मिविशेषेति। चैत्रादिव्यक्तिघटितेत्यर्थः। ननु चैत्रस्य यावद्विषयव
र्तमानयत्नवान्तथाविधव्यापारवत्वादित्यनुमानेचैत्रेवर्तमानयत्नानुभवनिर्वाहो [redacted] भविष्यतीत्यत आह। नचधर्मिक
रणेति। तथाविधयत्नव्यधिकरणकालादिव्यापारस्यापीत्यर्थः। चैतन्यादिनाभ्रमतेति। चैतन्ये व्याप्यत्वपक्षे। इदं तु स्वरू
पक्षनपरंतु हेतुतावच्छेदककोटौनिविष्टं तस्य नत्र निवेशप्रयोजनकाभावादिति। शोभनाद्रेरिति। ननु च सौंदर्यापरपद
घीयशोभनत्वविशिष्टतथाविधव्यापारस्यैव नत्र तथाविधवर्तमानयत्नानुमापकत्वमुपेयमिति वाच्यं। कार्याधारे
रपि सौंदर्यसंभवेन तथाविशिष्टहेतुसंभवे व्यभिचारस्य दुर्वारत्वात्। यत्तु तथाविधयत्नविशिष्टसमवायादेर्हेतुता॰

राम ॥१०॥

च्छेदकसंबंधत्वाभ्युपगमान्नव्यभिचारावकाश इति तदसत्। तस्य संबंधतायां प्रमाणाभावात् पचतीत्यादौ सर्वत्र त
त्वघटितत्वस्याभिप्रायविशेषस्य प्रमाणाभावाच्च। तत्र आख्यातस्येति। पचतीत्यादावाख्यातस्य जनकयत्ने लक्षणाभ्युपगमे
कार्यतादिस्यर्थः। लाघवेनेति। अन्यथा त्वसिद्धो नियतोत्तरवर्त्तित्वरूपजन्यतालक्षणव्यापारत्वस्याख्यातपदशक्य
तावच्छेदककोटिप्रवेशगौरवात् तद्धेयस्य कार्यसामान्यजनकतावच्छेदकत्वेन सिद्धत्वाय लेन गौरवेनवच्छेद्यतावच्छे
दककोटिनिवेशानवस्थानुचितत्वमितिभावः। ननु सर्वत्रिदं संभवति जन्यत्वस्याकृतरूपत्वे तदेवनतस्यातिरिक्तत्वाकारात्
तथात्वातिरिक्तजन्यतालक्षणव्यापारत्वस्याख्यातपदशक्यतावच्छेदककोटिप्रविष्टत्वेन किं चिदाधश्रूयस्याग्रस्यास्ये
कं चरणोगच्छतीत्यादौ लक्षणया अकल्पनमिति चेत्सत्यं। व्यापारत्वस्याख्यातपदशक्यतावच्छेदककोटिप्रविष्टत्वे नं तत्स
योगविभागादिरूपजन्यसामान्ये आख्यातपदशक्यत्वकल्पने गौरवोत्तरपक्ष्यप्रत्नमात्रेणच्छक्तिकल्पनेलाघवस्येति
स्फुटत्वात्। यत्नस्यापि व्यापारतया तत्रतच्छक्तिकल्पनस्य व्यापारसामान्ये शक्तिकल्पकस्याख्यानस्य पकृतो चैकिंचित्
आख्यातस्यसमवायमात्रे शक्तिः। समवायत्वे शक्यतावच्छेदकत्वातिरिक्तं मुख्यप्रयोगस्य रथोगच्छतीत्यादौ पचतीत्या
दौ च जनकयत्ने लक्षणेत्याहुः। तदपि नसम्यक्। अनंतसमवायेतच्छक्तिकल्पने गौरवात्। नच समवायत्वे न तयान

आख्या-टीका ॥११॥

गौरवावकाशो लाघवं चानंतयत्नशक्तिकल्पनायेक्षया स्फुटमेवेति वाच्यं। एकस्मिन्समवाये आख्यातशक्तिकल्पनेनैकव
लं चैत्रसमवधानं नवत्ताद्दशायां चैत्रो घटं जानातीति वत् मैत्रो घटं जानातीति प्रयोगापत्तेः। समवन्मते आलत्वादि समवायाप
त्याज्ञानादि समवायस्य वैलक्षण्याभावेन आलत्वादि समवायवृत्ति मैत्रत्व निष्ठ नानाभावदशायां अपि ज्ञानसमवायस्य
स हातः। यदि चाख्यातप्रत्यार्थ समवायान्वय तत्तद्यत्नत्वनिरूपित त्वविशिष्ट स्वरूपस्य संबंधत्वमंगीकृत्य लक्षणाबोधको ज्ञायः
संज्ञाश्रतेतत्थापि अतिरिक्त समवायत्वमाख्यातपदशक्यतावच्छेदकमुत विशेष्यता संबंधेन तन्नात्र विशेष्यक ज्ञाना
दिकमपि स्वन विनिशत्नाविदहं एको गौरवं दुरुद्धरमेव। यत्नशक्ति वादिमते तु यत्नत्वस्य जातितया तदितरस्य यत्नसामा
न्यसाधारणस्य गौरवेण शक्यतावच्छेदकत्वस्यासंभवद्बुद्धिकतया लाघवस्य ग्रहणेनापि अशक्यवारणीय त्वमेवे
ति सुधीभिर्दयत्वयमहनीयां शंकते। यत्नं विहायेति। लाघवादिति। जनकेंशक्तिवादिनाम पि। जनकांशे शक्तिकल्पन
स्यावश्यकतया जनकशक्तिवादिमतेऽप्यतिरिक्तशक्तिकल्पने न लाघवं यत्नं संभवादित्यर्थः। तथा चेति। जनकेनाम
शक्तिकल्पने चेत्यर्थः। अचेतनेपीत्यादि। रथो गच्छतीत्यादौ गमनजनकनोदनाद्याश्रयसंयोगादेः रथादौ सत्वेन आख्यात
स्य शक्यत्वे तत्प्रयोगस्य संभवेनेत्यर्थः। यत्नादौ लक्षणकल्पनापि नास्तीति भावः। अपचेत्सपीति। न चासाधारणजनकेश राम ॥११॥
ना

धार

क्तिस्वीकरणीतया अदृष्टस्य तु साधारणकारणतया न तद्धितपाकः पुरुषेप्य पचतीति प्रयोगापत्तिरिति वाच्यं। गौरवात्
तनुपाकजनकादृष्टजनककृतेरपि पाकजनकत्वं यागादिनो चैत्रकृति कालेपि पचतीति प्रयोगापत्तिरिति शंकां वारयति। पा
कजनकादृष्टजनकेति। मानाभावादिति। तस्य पाकादि जनकादृष्टजनककृत्वेन पाकप्रयोजकतयान्यथासिद्धत्वेन कार्यादिनो
ऽनुमानादि प्रमाणस्यानवताराद् इत्यर्थः। अतएवेति। न त्वजनकादृष्टजनककृतेस्तज्जनकत्वे प्रमाणाभावादेवेत्यर्थः। हिंसा
दाविति। हिंसितः सकर्तृकाकार्यत्वादितीश्वरानुमानेनेत्यर्थः। न तु जनकेति। हिंसादे [redacted] जनकेत्यर्थः। अपीतरप्रसंगोपीति।
हिंसापात ततो जन्यसकर्तृकत्वस्यादृष्टद्वारकेकृति जन्यत्वापि कतया ऽनुपपत्त्यभावादिति। न कृती प्रसाधनतायाविध्य
र्थत्वादिति सौ हेतुमतेन जनकादृष्टजनककृतेरपि तज्जनकस्य वेदबोधितत्वेन दुरपह्नवत्वात् कथमतिप्रसंगो द्रष्टव्य
त आह। भावेति। न तज्जनकादृष्टजनककृतेस्तज्जनकत्वे प्रमाणाभावेत्यर्थः। तादृशाकृतीति वारणायेति। तादृशकृतिको
त्वन पाचिचप्रयोगवारणाय इत्यर्थः। तथापीति। जनकमात्रशक्तिवादिनापीत्यर्थः। ननु जनकयत्नेख्यातस्य श
क्तिकल्पने शक्यतावच्छेदकगौरवाभ्रात् त्येस्यकेवलयत्ने त्वविशिष्टे शक्तिकल्पने स्येवौचित्यमित्यत आह। यत्नेत्वाभि
ति। यत्नत्वविशिष्ट मात्रमित्यर्थः। न चाख्यातस्य यत्न मात्रवाचकत्वे आख्यातपदयत्नपदयोः पर्यायतापत्तिः। तत्र

॥१२॥

कृतावच्छेदकावच्छिन्नशक्तत्वस्य पर्याप्तनामपदार्थत्वादिति वाच्यं। इष्टत्वात् अननुविधयित्वस्य चातुर्थस्य संसर्गतामनुपग
मे प्रकाराननुपधायकत्वापत्तेरो चरमलत्वतिपुरुषपच्चतीतिप्रयोगापत्तिरित्यत आह। जनकत्वं चेति। फलोपधायकत्वं चेत्यर्थः।
फलोपधायकत्वं चेत् तद्व्यक्तित्वावच्छिन्नजनकत्वे अतिरिक्तं चेत्स्यादेतत्र तदवैयाकरणमतमाह। कर्तृकर्मणोरिति। लक्ष
ण्या। आख्यातेनाम्ना। इतीति। इत्सत्र्थेस्त्वर्थः। सामानाधिकरण्यानुरोधादिति। नामाख्यातयोरेकधर्मितावच्छेदकत्वरूपस्य
मानाधिकरण्यस्यानुरोधात् सिद्धत्वादित्यर्थः। ननु चेतादृशानुभवं मानाभाव इत्यत आह। अन्यथेति। कर्त्राख्यातकर्मा
ख्यातयोः कर्तृकर्मणोरनभिधायकत्वे इत्यर्थः। तयोरिति। तृतीयाद्वितीययोरित्यर्थः। अनभिहितेनाधिकारीयत्वादिति। क
र्तृकर्मानभिधायकाख्यातसमभिव्याहारे विहितत्वादित्यर्थः। यत्राख्यातेन कर्त्ता नाभिधीयते तत्र तृतीया यत्र चाख्या
तेन कर्म नाभिधीयते तत्र द्वितीयाभियुक्तस्यान्तेति भावः। नन्वाख्यातस्य कृत्सभिधायकत्वानभिधायकत्वे वद्वितीया
तृतीययोर्नियामके सत्यख्यानव्ययमाख्यातस्य कर्त्राद्यभिधायकत्वं भिस्यत आह। कृत्सभिधानस्येति। अविशिष्टत्वादि
ति। कर्माख्यातस्याधारणत्वादित्यर्थः। तथा च नैयायिकनये कर्माख्यातस्यापि कृतिवाचकत्वमात्र तृतीयानेस्यादि
ति भावः। न च नैयायिकनये कर्माख्यातस्य कर्मत्वाधिकतया कथमेतदिति वाच्यं। प्राचीननैयायिकरेवैतदभिधानात् राम

॥१२॥

त। स्फुटीभविष्यति चेदमुपरिष्टादिति। शंकते। कर्तृकर्मणोरिति। नियमः। द्वितीयातृतीययोस्तदभावनियम इत्यर्थः। यत्र धातूत्ते
रप्रत्ययेन कर्तृगतसंख्याभिधीयते तत्र कर्तरि न तृतीया यत्र कर्मगतसंख्याभिधीयते तत्र कर्तरि तृतीया एवं यत्र धातूत्तरप्रत्य
येन कर्मगतसंख्याभिधीयते तत्र कर्मणि द्वितीयाभावः। तेन यत्र कर्मगतसंख्या नाभिधीयते तत्र कर्मणि द्वितीया इति भावः। चैत्रेण
दृश्यते घट इत्यादाविति। न च सुपःसंख्याभिधायकत्वं चैत्रो रूपवानित्युदाहरणे स्पष्टं। चैत्रेण दृश्यते घट इत्येतावद्दूरपर्यन्तानुधावनम् त
फलमिति भावः। ननु किं पारिहितवाक्ये समस्तीतिन्यायेन चैत्रो रूपवानित्यादौ गच्छतीति क्रियाया अध्याहार्यत्वात् तिङो वसेन तत्र संख्याबोधस
म्भवे सुपःसंख्याभिधायकत्वेनेति शंकनिराकरणं सम्भवेन सुपःसंख्याभिधायकत्वे सकिं मत इत्याबिश्च वाक्यपर्यन्तानुधावनस्याने
ष्फलत्वादिति। कृत्तद्धितसमासैः सुप एवेति। अत एव संख्या कृत्तद्धितसमासैः सुप इत्यादि इत्यर्थः। न तदभिधायकत्वमिति। न संख्याभिधायकत्वमिति
र्थः। तथा च देवदत्तो गच्छतीत्यादाविव तिङः संख्या न भिधायकत्वे न तृतीया स्यादिति भावः। नादर्शं सुपमिति। द्वित्वादिसंख्यायो
गे सुप्प्रभृतिस्वार्थः। द्वित्वादिप्रत्ययादिति। तथा च नत्रद्वित्वबोधान्वयानुपपत्त्या तिङोऽपि संख्यावाचकत्वमिति भावः। यत्तु चैत्रो मैत्र
श्च गच्छतः इत्यादौ मैत्रपदोत्तरस्य द्विवचनं द्वित्वादि लाक्षणिकतया द्वित्वादिबोधसम्भवे तिङः संख्याभिधायकत्वं निर्मुक्तमि
ति। तदसत् द्वयोपादिक्रियायामनाविरहेण तत्र वैत्रपदान्तरसुप्प्रविभक्तेरपि लक्षणया द्वित्वबोधकस्याबश्यकत्वे चैत्र द्वयं मैत्रद्वयं च प्र
तीयते स्यात्पते तदुकारत्वात्। तत्रैकवचनोपस्थितैकत्वान्वितत्वेनात्मेकवचं तिङुपस्थाप्यद्वित्वादेरन्वयस्तु नाशंकनीय इति तत्रैकत्वे

त

तस्य विवक्षितत्वादिति । ननु तथापि द्वयपदघटितयुक्त्यातिरेकेऽपि द्वित्वाभिधायकत्वमस्तु एकत्वाभिधायकत्वं तु तस्य निर्युक्तिकमित्याशंक्य
॥१३॥ मपाकर्तुमाह । लाघवादेकवचनत्वादिनैवेति । तथा चैकवचनत्वविशिष्टस्य सुब्व्यक्त्येकत्वशक्ततावच्छेदकत्वकल्पने गौरवात्[illegible]तावत्पर
कवचनत्वमेवैकत्वशक्ततावच्छेदकं लघुकल्पन[redacted]सुचितं । एकवचनत्वं चाभिमुक्त्वेकवचनत्वेन परिभाषितत्वं तच्च तिवादिसाधा
रणमिति तिवादेरप्येकत्वबोधकत्वमप्युपपादितमिति भावः । केचित्तु पचतीत्यादावाख्यातपदाल्लक्षणया शक्त्या वा कर्तुर्बोधेऽपि तत्र निय
मत एकत्वबोधस्यानुभवसिद्धत्वात्तिप एकत्वबोधकत्वमावश्यकं । न च तत्राख्यातस्यैव कर्तृत्वविशिष्टकर्तरि लक्षणेति वाच्यं । नियमतः
प्रतीयमानैकत्वस्यापि लक्षणया कल्पने यत्नेनाख्यातशक्तिकल्पनस्य निर्युक्तिकत्वं लक्षणयैव तत्र बोधसंभवादित्याहुः । केचित्कर्म
संख्याभिधानानभिधानाभ्यामित्याख्यातस्य नास्तीत्यत्र शक्तग्रंथोपरि वैयाकरणाः समाधानेऽहुतेत्यादि तथा च सुविभक्तिवि
नाहृतमेव यस्यावस्थानासंभवात् । कृत्प्रत्ययोत्तरसुप एव संख्याबोधसंभवेऽतः संख्याबोधकत्वं निर्युक्तिकं । न च विभि
मनाविरह इति वाच्यं । एकवचनत्वेन सुपस्तत्र शक्तौरन्यत्र क्लृप्तत्वात् । एवं च चैत्रो ग्रामं गन्तवानित्यादौ गम्यभिधानेऽनभिहिते
तायस्य संख्यानभिधायकत्वेन तृतीयापत्तेर्लक्षणायामशक्यवारणत्वादिति भावः । ननु यत्राख्यातेन कर्तृगतसंख्याभिधीय
तेतत्र प्रथमा यत्र च तेन कर्तृगतसंख्यानाभिधीयते तत्र तृतीयेत्यादिनियमो वाच्यः । कृत्प्रत्ययस्थले च कर्त्रादेरभिधानेन
भिधानाभ्यां तथा च तत्र न कोऽपि दोष इत्यत आह । किं चेति । न नियम इति । कर्माख्यातेन कर्तृगतसंख्याया अभिधीयते न तु कर्मगत

राम
॥१३॥

संख्या एवं कर्माख्यातेन कर्मगतसंख्यैवाभिधीयते न तु कर्तृगतसंख्येति नियमालाभ इत्यर्थः । ननु तादृशनियमालाभे का क्षति
रित्यत आह । पदार्थतावच्छेदकावच्छिन्नस्येति । एकत्वत्वावच्छिन्नस्येत्यर्थः । आकांक्षादिवशात् एकत्वावच्छिन्ननिरूपितशक्ति
वशादित्यर्थः । तथा च चैत्रो ग्रामं गच्छतीत्य[redacted]ख्यातेन कर्मगतसंख्याबोधने बाधकाभावेन तत्राप्यकर्मणि प्रथमा स्यात् । एवं
चैत्रेण तण्डुलः पच्यत इत्या[redacted]ख्यातेन कर्तृगतसंख्याबोधने बाधकाभावेन तत्राप्यकर्तरि प्रथमापत्तेरिति भावः । ननु कर्तृकव
चनत्वावच्छिन्नस्य कर्तृकत्वं शक्यतावच्छेदकं एवं कर्मकवचनत्वावच्छिन्नस्य कर्मैकत्वं शक्यतावच्छेदकं वाच्यं । तथा च शक्य
तावच्छेदकशक्यतावच्छेदकभेदान्न सर्वत्र कर्तृकर्मसाधारणैकत्वबोध इत्यत आह । कर्त्रेकत्वादिनाभिधाने चेति । कर्मैकत्व
त्वादिना कर्त्रैकत्वादौ कर्त्रैकवचनत्वावच्छिन्नादेः शक्तिकल्पनेनेत्यस्यार्थः । आदिना कर्मैकत्वादिपरिग्रहः । अभिधेयत्वं शक्यता
वच्छेदककोटिप्रविष्टत्वं । इदमुपलक्षणं । कर्त्रादिपदस्यापि शक्यतावच्छेदककोटिप्रविष्टत्वेन लाघवमपि बोध्यं । ननु एतेन ः
क्रियामात्रमभिधानमाह । शक्त्यादिव्यादिशब्दो विशेष्यगोचरैवमित्यन्तेनान्वयः । तथा चैकत्वादिघटितधर्मविशिष्टे शक्ति
कल्पनेन च तद्घटितधर्मस्य शक्यतावच्छेदकत्वकल्पनेन च नैकत्वादिपदघटितधर्मस्य शक्यतावच्छेदककल्पनेन च महागौर
वं । नैयायिकमतेऽवैयाकरणमते तु एकत्वादिना शक्यता एकवचनत्वादिना च शक्ततेति लाघवमस्ति स्फुटमिति भावः ।
वैयाकरणमतमनुपसंहरति । तस्मादिति । तत्तद्रूपेणैवेति । तित्त्वादिनैवेत्यर्थः । नन्वेवं सति वैयाकरणमते कर्तृकर्मसंख्या
धा

आ॰टी॰ तस्थले कर्मादौ संख्यान्वय इत्यत आह। एकपदेति। कर्मादिसंख्ययोरेकाख्यातपदोपस्थाप्यत्वादित्यर्थः। वाच्यगामित्वमिति। क
॥१५॥ र्माख्यातादिस्थले संख्यायाः कर्मादिषु अन्वयित्वमित्यर्थः। तथा चैकपदोपस्थाप्यत्वाभावान्मर्थीनामसत्त्वे वाच्येकत्वापरोन्वय इति
नियमेन एकत्वादिनिष्ठप्रकारतानिरूपितकर्तृनिष्ठविशेष्यतासंबंधेन कर्त्राख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रतिक
र्त्राख्यातपदजन्यकर्तृपस्थितेर्विशेष्यतासंबंधेन हेतुत्वस्य। एकमेकत्वादिनिष्ठप्रकारतानिरूपितकर्मनिष्ठविशेष्यता
संबंधेन कर्माख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रतिकर्माख्यातपदज्ञानजन्यकर्मोपस्थितेर्विशेष्यतासंबंधेन
च हेतुत्वस्य कल्पनीयतया न कर्त्राद्याख्यातस्थले कर्मादौ संख्यान्वय इति भावः। ननु कर्तरि आख्यातत्वेन कर्मणि च आख्या
तत्वेन पदत्वेन शक्तिकल्पने चैत्रः पच्यते तंडुल इत्यादिप्रयोगापत्तिः। न चाख्यातत्वस्याख्यातत्वेन कर्तरि शक्तत्वात् कर्तुरुपस्थि
तिसंभवेन आत्मनेपदत्वेन च तस्य कर्मणि शक्ततया कर्मणोपि उपस्थितिसंभवेन तत्र चैत्रतंडुलादौ च भेदसंबंधेनान्वय
बोधे बाधकाभावादित्यत आह। कर्तृकर्मेत्यादि। एकदान्वयबुद्ध्यनुत्पत्तिमिति। एकस्मिन्काले एकस्याप्यनुत्पत्तिरित्यर्थः। तथा च तदा
ख्यातपदजन्यकर्तृत्वप्रकारककर्तृशाब्दबुद्धित्वावच्छिन्नं प्रतिकर्मत्वोपग्रहीततात्पर्यकतदाख्यातपदज्ञानत्वादिना। एवं
तदाख्यातपदजन्यकर्मत्वप्रकारककर्मविषयकशाब्दबुद्धित्वावच्छिन्नं प्रतिकर्तृत्वोपग्रहीततात्पर्यकतदाख्यातपदज्ञानत्वा राम
दिना च प्रतिबंधकत्वस्य कल्पनीयतया नैकदा [redacted] एकाख्यातपदात् कर्तृकर्मणोर्बोधापत्तिरिति भावः। केचित्तु तदाख्या ॥१५॥

तपदजन्यकर्तृत्वप्रकारककर्तृविषयकशाब्दबुद्धित्वावच्छिन्नं प्रतिकर्मत्वबोधकसुविभक्तिसमभिव्याहृतधातुसमभिव्याहृतत
दाख्यातपदज्ञानजन्यकर्तृपस्थितेरेवं तदाख्यातपदजन्यकर्मत्वप्रकारककर्मशाब्दबुद्धित्वावच्छिन्नं प्रति च तृतीयांतपदसमभि
व्याहृतधातुपदसमभिव्याहृततदाख्यातपदज्ञानजन्यकर्मोपस्थितेश्च हेतुत्वस्य कल्पनीयतया नैकदा एकाख्यातपदात् कर्तृ
कर्मणोरन्वयबोधः। चैत्रश्चैत्रेण तंडुलं तंडुलः पच्यत इत्यादिप्रयोगे चेष्टापत्तिस्तत्रान्वयबोधस्याप्रामाणिकत्वादि
त्याहुः। तन्मते उपदर्शितरीत्या चैत्रः पच्यते तंडुल इत्यादिप्रयोगवारणेपि चैत्रः पचते तंडुलमित्यादिप्रयोगापत्तिर्दुर्वारैव तत्र :
कर्मत्वोपग्रहीततात्पर्यकाख्यातपदज्ञानाभावात् कर्मतावोधकसुविभक्तिसमभिव्याहृतधातुसमभिव्याहृततदाख्यातप
दज्ञानजन्यकर्तृपस्थितिसत्त्वाच्च। कर्तृबोधे बाधकाभावादित्यत आह। कर्तरीति। तथा च कर्तृत्वप्रकारककर्तृशाब्दबुद्धिज
नकतावच्छेदकोटौ आख्यातपदोद्देश्यकधातुसमभिव्याहृतत्वमपि निवेशनीयमिति नोपदर्शितप्रयोगापत्तिरिति भावः।
नैय्यायिकैः प्रत्ययवतिष्ठते। अनुवर्ततीति। नैय्यायिकनयेलाघवसिद्धकृतित्वादिशक्यतावच्छेदकाख्यातपदादुक्तानुत्वमि
भागमलीकं तत्कर्तृकर्मणोस्त्वाख्यातविधानविधानात् कर्तृकर्मसाधारण्येन संख्याबोधापादनं निराकर्तुमाह। मानत्वा
विशेषादिति। समानपदोपात्तत्वेनेति। एकपदोपस्थाप्यत्वमेवेत्यर्थः। एकान्वयित्वस्य वाच्यकं विना नियमतः कृत्वादित्यर्थः।
नन्वेकपदोपस्थाप्यत्वाभावा एकार्थान्वयित्वनियमोऽप्ययोजकत्वादुपेक्षणीय इति चेन्नो वा। तथा विद्यनियमस्वीकारे लाघव

श्रा॰टी॰ ॥२५॥ त्वैव प्रयोजकत्वसंभवादिति। तथाहि। आख्यातपदोपस्थाप्यभावनारूपे कार्ये स्वान्वयबोधार्थं अवश्यं पदार्थांतरे वैजात्युपस्थि-
तिकल्पनमावश्यकं। अन्यथा पदार्थांतरस्य चैत्रादेः पदजन्योपस्थितत्वाभावे शाब्दबोधे भानापत्तौ तत्र भावनान्वयस्यानुप-
पत्तेः। तथा च संख्याभावनयोरपि चैत्राद्यन्वयस्वीकारे पदार्थांतरोपस्थितौ तत्राकल्पनप्रयुक्तलाघवमतिस्फुटमेवेत्युक्तनिय-
माभ्युपगमः। नवीनास्तु नियमानभ्युपगमेऽप्येते साक्षात्कृतिसाध्यत्वान्वितपाके संख्यान्वयापत्तिरिति वाच्यं। आख्यातपदज्ञानज-
न्यसंख्याप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदजन्याख्यातपदार्थभावनाविशेष्योपस्थितेर्विशेष्यतासंबंधेन हे-
तुत्वस्य कल्पनीयतया उपदर्शितापत्तेरभावात्। न च तथाप्युपदर्शितनियमभंगप्रसंग इति वाच्यं। अन्यथानुपपत्त्या तादृशो-
नियमे कृतिसाध्यत्वेऽपि साधनत्वाद्यतिरिक्तत्वेन एकपदोपस्थाप्यस्य विशेषणीयत्वादिति सारं। ननु भावनैव कुत्रान्वेति
कुत्र नेत्यत्र किं नियामकं तत्राह। भावनायाश्चेत्यादि। अन्वययोग्य इति। तथाविधान्वयः कार्यकारणभावसिद्ध इत्यर्थः। तथा
च कर्मत्वाद्यनवरुद्धप्रथमांतपदोपस्थाप्यस्यैवाख्यातार्थभावनाया विशेष्यत्वेनान्वययोग्यत्वस्य कार्यकारणभावसिद्धत-
या अन्यत्र भावनान्वयविरह इति भावः। ननु कीदृशकार्यकारणभावस्तथान्वयबोधस्तत्राह। न चेति। भावनानिष्ठप्रका-
रतानिरूपितविशेष्यतासंबंधेनाख्यातपदज्ञानजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति विशेष्यतासंबंधेन प्रथमांतनामपद- राम
ज्ञानजन्यकर्मत्वाद्यनवरुद्धविशेष्यकोपस्थितित्वेनैव हेतुत्वं। सा कोशलादिति। शाब्दबोधपदजन्योपस्थित्योः कार्यकारणभाव- ॥२५॥

सिद्ध२

कल्पनादित्यर्थः। तथा च तादृशकार्यकारणभावकल्पनबलात्तथाविधप्रथमांतपदोपस्थाप्यभावनाया विशेष्यत्वेनान्वयनियम इ-
ति भावः। ननूपदर्शितकार्यकारणभावे कारणतावच्छेदककोटौ कर्मत्वाद्यनवरुद्धविशेषणं व्यर्थं। यदि च कर्मत्वाद्यनवरुद्धत्वविशे-
षणमनिवेश्य तथाविधान्वयबुद्धिं प्रति प्रथमांतपदजन्योपस्थितेर्हेतुत्वे चंद्र इव मुखमस्तीत्यादौ प्रथमांतपदोपस्थितिविषय-
चंद्रे सादृश्ये च भावनाया अन्वयप्रसंगस्तदा प्रकृतशाब्दबोधेतराविशेषणत्वाभावकं कर्मत्वाद्यनवरुद्धत्वं तत्र कारणतावच्छेदक-
कोटौ निवेश्यमिति विभाव्यते तथापि तत्र पदे प्रथमांतत्वविशेषणं व्यर्थमेवेति यांतपदजन्योपस्थितिविषयीभूतार्थस्य
शाब्दबोधे कर्मत्वविशेषणतया इतराविशेषणत्वविरहादेव तत्र भावनाया अन्वयबोधापत्तिवारणसंभवात्। एतेन भावनानि-
ष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनाख्यातपदजन्यशाब्दबुद्धित्वावच्छिन्नं प्रति प्रथमांतपदोपस्थितेर्विशेष्यतासंबंधेन
हेतुत्वं कल्प्यते न तु न कर्मत्वाद्यनवरुद्धत्वमपि तन्निवे[illegible]नेतस्य निर्वचनाशक्यत्वात्। न च प्रकृतशाब्दबोधेतराविशेषण-
त्वमेव तत्प्रकृततत्त्वे तत्पदजन्यत्वमिति वाच्यं। चंद्र इव मुखं चंद्रो राजत इत्यादिवाक्यद्वयजन्यसमूहालंबनबोधे चंद्रे भावना-
न्वयानुपपत्तेः। न च प्रथमांतपदज्ञानजन्यशाब्दबोधे विशेष्यताभाववत्त्वमिति तथाविधशाब्दबोधेतराविशेषणत्वमेव त-
दिति वाच्यं। तथा सत्येतादृशधर्मस्योपदर्शितकारणतावच्छेदककोटौ निवेशे परस्परविशेषणविशेष्यभावे विनिगमनाविर-
हेण कार्यकारणभावबाहुल्यस्य दुष्परिहरत्वात्। तथाविधान्वयबुद्धिं प्रति स्वीयविशेष्यताभाववद्विशिष्टप्रकारतासंबंधेन शा-

भा·वा·टी द्वोधस्यैवकार्यकालवृत्तितयाप्रतिबंधकत्वकल्पनमुचितं।तादृशप्रतिबंधकाभावादिकारणत्वकल्पिकायुक्तिःकर्मेत्याचनेव
५१८। रुद्धत्वेदृशादित्यं येन दर्शिता।तादृशयुक्तौतथाविशेषणानुपादानेतादृशप्रतिबंधकाभावस्यहेतुत्वापत्त्या चेदृशयुक्तेम
त्तौ सादौ चं दृशादिपदार्थभावनायाअन्वयप्रसंगइतितदुपादानमित्यपिपरास्तं।उपदर्शितप्रतिबंधकाभावस्यहेतुत्वेपदज
न्यपदार्थोपस्थितिकारणतावच्छेदककोटौयदांशप्रथमांतत्वविशेषणलोपादानस्यव्यर्थतयातदुपादानसंपादनतयावि
धुविशेषणस्ययुक्तौनिवेशप्रयोजनाभावादितिचेन्नैवंतत्रतदनिवेशादितीयाविभक्त्यंता×तत्र×यनेकपदेषुतयावि
धोपस्थितिनिष्ठकारणतावच्छेदकत्वकल्पनेगौरवात्।मन्मतेप्रथमांतपदएवतत्कल्पनेपितुल्यत्वस्येवोपदर्शित
कारणतावच्छेदककोटौयदांशप्रथमांतत्वनिवेशसंपादकतयोपदर्शितयुक्तावपितादृशविशेषणनिवेशस्यावश्य
कत्वात्।अन्यथातदनुसारेणोपदर्शितविशेषणघटितकार्यकारणभावकल्पनायाअयोगादिति।नन्वनुमानतायाउक्ता
दित्यस्योपदर्शितरीत्यायुक्तिपरत्वेतथैवेत्यादित्यस्यकोर्थइतिचेत्तमेवहितथैवेति।तादृशयुक्त्यनुसारेणतद्
पेतौवेत्यर्थः।तथाचप्रतिबंधकाभावत्वंतादृशपदजन्योपस्थितित्वादिनैवेतितुनिर्गलितोर्थः।साकांक्षत्वात्कार्यकारे
णभावस्याकांक्षाविषयत्वात्कल्पनीयत्वादिति।तथाचोक्तयुक्त्यनुसारेणोपदर्शितकार्यकारणभावकल्पनेपि राम
भावनायाअन्वयनियमउपपादनीयइतिभावः।२यावत×उपदर्शितयुक्तौकिंमानमितितुनाशंकनीयं।तत्राप्यनुभवस्यै ॥१८॥

वशरणीयत्वात्।अन्यथायुक्तिमात्रस्यैवोच्छेदापत्तेरितिहृतंपल्लवितेन।तत्रैवेति।भावनाविशेष्यकत्वेतिकर्माणिचेत्यर्थः।ननु
भावनाविशेष्यसंसर्ग्यान्वयस्वीकारेचैत्रेणसुप्यतइत्यादौसंख्यानन्वयापत्तिस्तत्रभावनाविशेष्यविरहात्।नचतत्रेष्टापत्तिमाहाचै
त्रेणसुप्यतइत्यादिना।प्रथमांतपदाभावादित्यस्यभावनाविशेष्यविरहादित्यर्थइतिमतेनैनसहान्वयः।ननुचैत्रेणसुप्यतइत्यादौ
तत्रैवभावनाविशेष्यत्वेनान्वेतु।तथाचतत्रैवसंख्यान्वयसंभवेकिमर्थमुपदर्शितस्थलेसंख्यायानान्वयइष्टापत्तिरित्यतआ
ह।यथाश्रुतेति।युक्तत्वादिति।तथाचभावनाविशेषणत्वेनैवधात्वर्थान्वयइतियुक्तिबलसिद्धस्यचैत्रःस्वपितीत्यादौधात्वर्था
दिनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनतथाविधवाक्यजन्यशाब्दबुद्धित्वावच्छिन्नंप्रतिआख्याततत्पदज्ञानजन्यभावनोप
स्थितेर्विशेष्यतासंबंधेनहेतुत्वस्यकल्पनात्।चैत्रेणसुप्यतइत्यादौसत्यपिभावनायाविशेष्यत्वेनान्वयबोधकत्वमितिभावः।ने न९
त्यभावनाविशेषणत्वेनैवधात्वर्थान्वययुक्तेरभ्युपगमात्तत्स्थलसंकोचःकल्पनीयःभावाख्यातस्थलेतथात्वपिस्यैवभाव
नाविशेष्यत्वेनान्वयइतियुक्तेरनंगीकारस्यकार्यकारणभावांतरकल्पनयोपदर्शितस्थलेधात्वर्थविशेष्यकभावना
प्रकारकबोधांगीकारेस्वीकृतेविरहइत्यतआह।भावनायाधात्वर्थान्वयित्वादिति।चैत्रेणसुप्यतइत्यादावाख्यातार्थस्यमनुष्यायाभा
वनायास्तापिनतत्रान्वयासंभवादित्यर्थः।ननुनिरूपकत्वसंबंधेनैवतत्रतस्यान्वयःसंभवतीतिचेत्।तथासतिचैत्रेणसुप्यतेमै न
त्रेणेत्यादावन्वयानुपपत्तेः।नचैतत्रनिरूपकत्वसंबंधावच्छिन्नप्रतियोगिताकाश्रयत्वाभावस्यस्वापेऽन्वयसंभवान्नतत्रैन

आ(व्या)-टी. अर्थान्वयानुपपत्तिरितिवाच्यं। इत्थं नियामकसंबंधस्याभावप्रतियोगितानवच्छेदकतयानिरूपकतासंबंधावच्छिन्नप्रतियोगिता
॥१८॥ काश्रयत्वाभावस्यालीकतयासंभवेनोपदर्शितानुपपत्तेर्दुर्वारत्वात्। एकवचनं त्वित्यादि। अत एव भावाख्यातस्थले एकवचनस्यसा
धुत्वादेवेत्यर्थः। औत्सर्गिकमिति। प्रथमोपस्थितमित्यर्थः। अन्यथा चैत्रेण सुप्यतइत्यादौ एककालीनत्वसंबंधेन स्वापे आश्रयत्व दि
स्यान्वय इति तु न शंक्यं स्मर्त्तव्यमपि। तत्र तेन संबंधेनाश्रयत्वस्यान्वयनिराकांक्षत्वात्। मैत्रस्य गमनदशायां मैत्रस्वापांतरमादायापि मै
त्रेण सुप्यत इतिप्रयोगसंभवाच्चेति। ननु तत्रैकवचनार्थसंख्याया अनन्वये एकवचनं व्यर्थमित्यत आह। ×× अथवेति। तत्र स्वापा
दौ संख्याया अनन्वयस्वीकारे स्वापद्वित्वबहुत्वेपि भावाख्यातस्थले द्विवचनबहुवचनापत्तेः। तत्रेष्टापत्तिर्न संभवति। अभियुक्तविरु
द्धत्वादिति भावः। ननु भावाख्यातस्थले संख्याभावनयोरनन्वये मानं वतिहानेरर्थक्यमित्यत आह। एवं चेति। भावाख्यातस्थले सं
न ख्याभावनयोरन्वये चेत्यर्थः। यथा पचमित्यादि। वर्त्तमानत्वं लडर्थः। इष्टसाधनत्वं लिङर्थ इत्यर्थः। इष्टसाधनत्वादिकमित्यत्रा
दिपदमतीतत्वकृतिसाध्यत्वाद्यर्थकं। ननु लिङर्थेष्टसाधनत्वादेः लङर्थातीतत्वादेः कुत्रान्वय इत्यत आह। तत्रेत्यादि। लिङर्थेष्टसाध
नत्वलङर्थातीतत्वादिकं चेत्यर्थः। ननु तथान्वये मानाभाव इत्यत आह। तथैवेति। लिङादिसमभिव्याहारस्थले धात्वर्थविशेष्य
केष्टसाधनत्वप्रकारकबोधस्यैवानुभवसिद्धत्वादित्यर्थः। इदमत्रावधेयं। चैत्रेण सुप्यतइत्यादौ वृत्तित्वं तृतीयार्थः। वर्त्तमा राम
नत्वं भावतिङर्थः। धात्वर्थः स्वापः। तथा च चैत्रवृत्तिवर्त्तमानस्वापइत्यन्वयबोधः। एवं चैत्रेण सुप्येतइत्यादौ भावतिङ इष्टसा ॥१८॥

धनत्वादिकमर्थः। तथा च चैत्रवृत्तिः स्वाप इष्टसाधनं कृतिसाध्यश्चेत्याकारकान्वयबोधः। एवमन्यत्रापि सूक्ष्ममतिभिश्चिंतनीयमिति।
तद्बोधकानामिति। वर्त्तमानत्वादिबोधकानामित्यर्थः। ननु भावनायाः प्रथमं तत्परोपस्थापकेन संबंधेनान्वयः। न तावदाश्रय
संबंधेन चैत्रेण पच्यते तंडुल इत्यत्र तंडुले आख्यातार्थकृतिरूपाया भावनाया बाधितत्वादित्य[redacted]त आह। भावनामात्रेति। आश्र
यत्वेन आश्रयत्वसंबंधेनेत्यर्थः। अन्यथेति। वक्ष्यमाणपरंपरयेत्यर्थः। तथा च साक्षात्परंपरया वा भावनाविशेष्य एव संख्याया
अन्वयनियमइ[redacted]ति भावः। न च संख्यायातिरिक्ताख्यातार्थभावस्य भावनापदशक्यतया कर्माख्यातस्थले कर्मत्वस्याख्याता
र्थतया साक्षात्भावनाविशेष्य एव संख्यान्वयनियमोस्त्वलं परंपरयावत्वस्य निवेशनेति वाच्यं। प्राचीनमते कर्माख्यातस्य
पि कृत्यर्थकतया कर्माख्यातार्थकृतौ भावेन कर्मत्वस्य भावनात्वविरहाद्दुपदर्शितानुपपत्तेरभावादिति। ननु यथा चैत्रेण पच्यते तंडुल
इत्यत्र नैयायिकमते परंपरया कर्मणि कृतेरन्वयः तथा चैत्रेण पचति तंडुल इत्यत्रापि कथं नान्वयबोधः। एवं नैयायिकमते चै
त्रः पच्यते तंडुलमित्यत्रापि आश्रयतासंबंधेन कृतेरन्वयबोधापत्तिः। एवं मैत्रेण पश्यते तंडुल इत्यत्र वा कथं न तन्मते कर्तृकर्मणो
र्वैपरीत्येन कृतेर्न्वयः दर्शितस्थलेषु संदेहाख्यातपदात् कृतेरुपस्थितिसत्त्वादित्याशंकामपाकर्तुमाह। तथैवेति। वैयाक
रणस्येत्यर्थः। तेनापान्वयबोधकत्वमिति। कर्त्तृकर्मणोरिव कृतेर्बोधकत्वमित्यर्थः। तथा च वैयाकरणमते तादृशतादृशाद्
बुद्धित्वावच्छिन्नंप्रतितादृशानुपूर्वीज्ञानत्वेन हेतुत्वं नैयायिकमतेपि तादृशशाब्दबुद्धित्वावच्छिन्नं प्रतितादृशतादृशानुपूर्वीज्ञा

आख्या
॥१२८॥

नत्वेनहेतुत्वकल्पनानान्यानुपपत्तिरितिभावः। तथाविधकार्यकारणभावकल्पनाबीजं स्वयमेव स्पष्टयति। अतइति। तथाविधकार्य
कारणभावकल्पनादित्यर्थः। नत्वयोग्याइति। नतादृशशाब्दबोधजनकाइत्यर्थः। ननुभावनायाः कृतिरूपत्वेन तद्विशेष्यसंख्यान्वयनि
यमोंगीकारे रथोगच्छतीत्यादौकथं रथसंख्यान्वयः। भावनाविशेष्यत्वाभावादित्यत आह। भावनाचेति। संख्याघटितादिकार्यतावमे स्यान
वटुकनियमश्चकृत्यभ्यतभावनापदार्थइत्यर्थः। अचेतनानुरोधादिति। रथोगच्छतीत्यादौ रथादौ संख्यान्वयानुरोधादित्यर्थः। तथा
चाख्यातस्य कर्त्रादिगतसंख्याभिधानानभिधानाभ्यामेव प्रथमातृतीयादिनियमोपपत्तौ आख्यातस्य कर्त्रादिशक्तिमनुप
गच्छतोवैयाकरणानांमतमनादरणीयमेवलघुकृतिशक्तिवादिनैयायिकमतेश्रद्धेयानेःसुधीभिरित्यर्थः। ननुनैयायि
कमतेआख्यातपदचैत्रपदयोर्विभिन्नरूपेणएकधर्मिबोधकत्वरूपसामानाधिकरण्यानुभवोऽनुपपन्नः। तथाचानुभवहत
विशेषणात्कथंतन्मतमनुमतमित्यतआह। विभिन्नाभ्यामित्यादि। तथाचतादृशानुभवएवासिद्धइतिभावः। अन्यादृशेति। ए
कधर्मिवृत्तिविभिन्नधर्मबोधकत्वरूपसामानाधिकरण्यमित्यर्थः। अत्रवैयाकरणमतानुयायिनः आख्यातस्य कर्त्रादिशक्तिक
ल्पनेनैयायिकमतमपेक्ष्यलाघवसंभवात्तथैवोचितं। तथाहि। मन्मते कर्त्रादिप्रकारकज्ञानाभावलौकिकप्रत्यक्षत्वावच्छिन्नंप्रतिआ
ख्यातपदनिरूपितशक्तिज्ञानादिघटितशाब्दबोधसामग्र्याः प्रतिबंधकताकल्पनेऽपि तथाविधशाब्दबोधसामग्रीकालेकर्तृप्रका
रकज्ञानाभावासत्वेनविषयासत्तयैवतथाविधलौकिकप्रत्यक्षानुत्पादसंभवेनतथाविधप्रतिबध्यप्रतिबंधकभावकल्पनाभावप्रयु राम ॥१२८॥

क्तलाघवमतिस्फुटमेव। नैयायिकमतेतुतथाविधशाब्दबोधसामग्रीकालेतादृशज्ञानाभावरूपविषयसत्वेनविनातथाविधप्रतिबध्यप्रतिबं
धकभावकल्पनंनेत्यावश्यकप्रत्यक्षवारणायशक्यमितितत्कल्पनंमहद्गौरवमिति। नचवैयाकरणमतेकृतिप्रकारकज्ञानाभावप्रत्यक्षंप्रतितथा
विधशाब्दबोधसामग्र्याः प्रतिबंधकत्वकल्पनावश्यकत्वेननैयायिकमतमपेक्ष्यलाघवावकाशः। नैयायिकमतेतथाकल्पनाभावादितिवा
च्यं। वैयाकरणमतेकर्तुरुपस्थितिकालेकृतिप्रकारकज्ञानसत्वस्यावश्यकतयातथाविधशाब्दबोधसामग्रीकालेविषयासत्तयैवअकृतिप्रकार
कज्ञानाभावप्रत्यक्षवारणसंभवेनतथाविधप्रतिबध्यप्रतिबंधकभावस्याकल्प्यतयाऽपदर्शितलाघवस्यासुस्थत्वात्। यदि च नवीनोक्तरत्या
लौकिकसंनिकर्षेतत्रतथाविधप्रतिबध्यप्रतिबंधकभावहेतुत्वंनाधिकमितिमन्यते तथापितादृशप्रतिबंधकाभावेनप्रत्यक्षहेतुत्वसंबंधकल्प
नागौरवंनैयायिकानामित्यलम्। तदपिनविचारसहं। गुरुशरीरव्यापारानुकूलकृत्याश्रयप्रकारकयोग्यताज्ञानेनतथाविधरूपात्ये समेदज्ञाना
भावसत्वकथाभावहेत्वादिरूपगुरुधर्मावच्छिन्नादिघटितशाब्दबोधसामग्र्यभावेअनंतधूम [illegible] प्रत्यक्षकारणत्वसंबंधकल्पनेनवैयाक
रणमतेगौरवस्यसंभवादित्यास्तांविस्तरः। तत्पदमिति। केनसंबंधेनभावनायाविशेष्यइत्यपेक्षायां [illegible] कते। विषयतयेति। अन्वयश्चास्य
कर्मपदार्थैकदेशभावनायांविशेष्य। तथाचतंडुलःपच्यतेतंडुलइत्यादौतंडुलोविषयतासंबंधेनभावनायांविशेष्यइत्यर्थः। सविषयव्यापा
रइति। सविषयव्यापारानामिच्छादयइत्यर्थः। रथेनगम्यतेग्रामइत्यादौ नोदनाख्यसंयोगरूपव्यापारस्याख्यातार्थतया तस्य च नि
र्विषयकतया विषयतासंबंधेनभावनायां … दर्शितरीतेरसंगतत्वात् संगतत्वइति कतेतिभावः। … निष्ठ
… कान्नुकूलभावनानद्विषयत्वंतंडुलइत्यर्थः। तंडुलेनपाविषयभावनाविशेष्यनिषयत्वंतत्पादानतारव्येत्यादिसंबंधेयं। कर्मख्यातस्य

लेकर्मत्वप्रकारककर्मविशेष्यकबोधस्यानुभवसिद्धत्वेनाहामेत्यनिषेधेति। प्रतीयत इतीति। शाब्दबोधजनकत्वबोध इति शेषः। सामान्यतः पदं पदार्थ
चेति। अत्र चोपदर्शितबोधद्वयोर्विकल्पानुरोधेन न तथा वैकल्पिकोपादानमिति ध्येयम्। दधेनगम्यते ग्रामं इत्यादौ ग्रामे भावनाया अन्वयप्रकारमा
॥१९॥ हरति नगम्यत इत्यादिना। तथा च कर्माख्यातस्थले भावनायां धात्वर्थान्वयः क्वचिद्विषयतया क्वचिज्जन्यतया कर्मणि तु परंपरयेति नाकः।
प्राचीनमतं दूषयितुं नवीनमतं दर्शयति। नव्यास्त्विति। न तु कर्माख्यातस्थले आधेयत्वस्य तृतीयार्थत्वे न कर्त्राख्यातस्थले यत्र भा
वनाविशेषणत्वेनान्वेति कर्माख्यातस्थले सप्तव भावनाया विशेषणत्वेनान्वेतीत्यनुभवविलोपापत्तिः। एवं नाद्धशाब्दबोधेन तथा विषयबो
धजनने आधेयत्वे तृतीयापदनिरूपितवृत्तिज्ञानस्य सहकारित्वकल्पने गौरवं चेत्यत आह। संख्यामात्रं चेति। आत्मपदं नाख्यपदत्वमेव
खेदः। संबन्धः। चेत्रभावनयोः संबन्ध इत्यर्थः। वाक्यार्थ इति। तथाविधवाक्यानुपूर्वीज्ञानवलात् बोधोपेयतत इत्यर्थः। तथा च तथाविध
श्रवणानुभवसत्त्वात् संख्यामात्रं तृतीयार्थः। आधेयत्वं तु संसर्गमर्यादया भासत इ[redacted]त्येतिवाक्यार्थ इत्यर्थः। तद्दर्शीति फलमपीत्यर्थः। तिभावः२
तथा तिवाक्यार्थसंबन्ध इत्यर्थः। भासमान इत्यादि। तथा च नामार्थधात्वर्थयोर्भेदान्वयबोधानभ्युपगमेन कर्माख्यातस्थले फलप्रका
रकबोधानुभवापलापेन चेत्रफलस्य संबन्धविधया भानासंभवादि[redacted]क्रियाजन्यफलशालित्वादिति। जन्यतासंबन्धेन क्रियायां विशे
यत्फलं तत्स्वधात्वर्थतालाभादित्यर्थः। विशेषणविशेष्यभावेत्यादि। फलविशेष्यकक्रियाविशेषणकबोधस्यधात्वर्थतो शक्यतादित्यर्थः।
एतावता प्राचीनमतं दूषयित्वा नवीनः स्वमतमुपसंहरति। तस्मादिति। इत्थं चेति। फलस्यात्वेनेपदार्थत्वे चेत्यर्थः। नन्वेवं तिता तथा च राम
कर्माख्यातस्थले फलविशेष्यकजन्यतासंसर्गकक्रियाविशेषणकोबोधो नुपपन्न इति भावः। भावनाविषयस्य ॥१९॥

तिभावः५

चेति। भावनाया विषयस्य चेत्यर्थः। फलेऽन्वयेन जन्यतासंबन्धेन फलेऽन्वयोऽन्यत्र क्लृप्त इति। कर्त्राख्यातस्थले क्लृप्त इत्यर्थः। तथा च तत्राख्या
तार्थं तदेव वर्तमानत्वादौ धात्वर्थस्यान्वयापत्तिवारणाय धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति आ
ख्यातपदजन्यवृत्त्युपस्थितेर्विषयतासंबन्धेन हेतुत्वस्य कल्पनान्न धात्वर्थविशेषणत्वेन तिङर्थकृतेरन्वय इति भावः। कृत्यन्तर्भावे
केति। कृत्यनभिधायकेनामावकर्मविहितकृत्प्रत्ययस्तद्योगे न भावना शक्तेस्तृतीयापदमपसुप इत्यर्थः। अनुपन्नत्वादिति। चेत्रेण
गतमित्यादिभावनाविहितकृत्प्रत्ययस्थले क्लृप्तत्वादित्यर्थः। तथाविधकृत्प्रत्ययस्थले प्रत्युत पूर्वं कृतिविषयप्रकारतानिरूपितविशे
ष्यतासंबन्धेन शाब्दबुद्धिं प्रति धातुजन्योपस्थितेर्विशेष्यतासंबन्धेन हेतुत्वस्य क्लृप्तत्वात् सुवर्णं कृतिप्रकारककर्मविशेष्यकबोधे
ष्टाभाव इति भावः। अन्योन्याख्यातस्य कृतिकर्मत्वाभिधायकत्वे चेत्रेण पचति तण्डुलः तण्डुलं पच्यते चेत्रेणेत्यादिप्रयोगापत्तिरित्यत आह
कर्तृकर्मणोरिति। वैयाकरणमते यथा कर्त्राख्यातत्वं कर्तृशक्ततावच्छेदकं यथा च कर्माख्यातत्वं कर्मशक्ततावच्छेदकं तथा नैयायिका
नामपि कर्त्राख्यातत्वं कृतिशक्ततावच्छेदकं कर्माख्यातत्वं कर्मशक्ततावच्छेदकमिति। उपदर्शितस्थले कृतिकर्मत्वयोर्बोधा
भावात् नोपदर्शितप्रयोगापत्तिरिति भावः। कृतिकर्मत्वयोः शक्यत्वे तावच्छेदके कर्त्राख्यातत्वकर्माख्यातत्वे उपेते नाख्यातत्वं
भिन्नयोः पक्षे नकारान्तरमाह। नवेति। तथा सुतिपस्थाने तङ्लोपेत्यादिप्रयोगापत्तिरपि दुर्वारेति भावः। कर्त्राख्यातत्वमेव कृति
शक्ततावच्छेदकं लाघवात् न च समुच्चप्रयोगापत्तिः। कृतिविशेष्यकाख्यातपदनिरूपितशक्तिज्ञानेन कृतिशाब्दबोधे जनने नीयते
त्रसंडुलं पचतीत्यादावानुपूर्वीज्ञानस्य सहकारित्वकल्पनात्। एवं कर्मत्वविशेष्यकाख्यातपदनिरूपितशक्तिज्ञानेन कर्मत्वबोधे जननीये

न

चैत्रेण पच्यते तण्डुल इत्यादावानुपूर्वीज्ञानस्य सहकारित्वकल्पनाद्योपदर्शितापत्तेरभावादिति। एवमन्यत्रापि शंकापंकोद्धानुपूर्वीज्ञा
नसहकारित्वरूपसलिलधाराघोरणीभिरपनीय इति प्राहुः। ननु कर्माख्यातस्य चेत्तन्न हन्त स्वपरनामकभावनार्थकत्वे हि तर्हि कुतो नीचै
॥२०॥ नान्वयित्वनियमः। चैत्रेण पच्यते तण्डुल इत्यादौ भावनान्वयितण्डुलसंख्यान्वये तत्वमपि चारादित्यत आह तिङुपस्थापि
ताया इति। तथा च संख्यायाः प्रथमान्तोपस्थाप्य एवान्वयनियमो न तु भावनान्वयिनि। तस्याश्च अन्वयनियम इति भावः। नन्वाख्यातोप
स्थाप्यान्वयिन्येव संख्याया अन्वयनियमः किं नाभ्युपेतस्तथा सत्यपि कर्माख्यातस्थलेऽनुपपत्त्यभावादिति चेन्नोत्तरयानियमार्गीका
रे नश्यतीत्यादौ वर्तमानत्वादिविशिष्टेपि संख्यान्वयप्रसंगादिति। कर्तृकर्मविहिताख्यातशक्तिमुपपाद्य कर्तृकर्मविहितकृत
स्य शक्तिमुपपादयति। चैत्रो गन्तेत्यादि। अपस्यार्थतामित्यस्य तस्य कर्तृकर्मणी कृद्वाच्य इत्यनेनान्वयः। कर्त्रादिविहितकृतः कर्त्राद्यवा
चकत्वे चैत्रो गन्तेत्यादौ समानलिंगकत्वनिर्देशानुपपत्तेः समानलिंगकस्थले भेदान्वयस्यानुभवसिद्धतया तत्स्यान्निर्वाहादिति भा
वः। ननु तादृशानुभवे मानाभाव इत्यत आह। भोक्ता व्यतीत्यादि। अत्र च कृत्प्रत्ययस्य कर्त्राद्यवाचकत्वे भोजनानुकूलकृतिमान् व्य
म४ तीत्याद्यन्वयबोधस्यात्र च विशेषदर्शिनोऽनुपपन्न इति विशेषदर्शिनां तादृशबोधो भोजनानुकूलकृतिमान् व्यतीत्याद्यन्वयबोधो
पपत्त्यर्थं कर्त्रादिविहितकृतः कर्त्रादिवाचकत्वमावश्यकमिति भावः। सामानाधिकरण्यादीति। अभेदान्वयबोधादौ तु यथा आदिना
भोक्ता व्यतीत्यादौ भोजनानुकूलकृतिमान् व्यतीत्याद्यन्वयबोधपरिग्रहः। ननु कृत्प्रत्ययस्य कर्त्रादिवाचकत्वे गन्तेत्यादौ बाधितार्था राम
न्वयानुपपत्तिः। कर्त्रादेः कृत्यास्य यादिरूपतया हेत्वादेः पदार्थैकदेशत्वेन तदानुकूल्यादि संबंधेनान्वयासंभवादेरन्वयासंभ ॥२०॥

वादित्यत आह। चैत्रस्य न सेत्यादि। मानसपदस्य जन्यपुरुषजन्यपुरुषरूपं पुत्रपुत्र वाचकतया जन्यत्वस्य पदार्थैकदेशत्वेपि तत्रैव चैत्रस्येति
षष्ठ्यन्तार्थस्य चैत्रसंबंधित्वस्यान्वयः जन्यपुरुषजन्यपुरुषरूपनप्तृपदार्थे चैत्रसंबंधित्वस्यान्वये चैत्रपुत्रेपि नप्तृत्वप्रसंगात्
तथा च तत्र यथा पदार्थैकदेशेऽन्वयस्तथा चैत्रो गन्तेत्यादौ पदार्थैकदेशे धात्वर्थे गमिकारे विकृतिविरह इति भावः। ननु जन्यपुरुषजन्यपुरु
षत्वस्य नप्तृपदशक्यतावच्छेदकत्वे विशिष्टशक्तिकल्पने गौरवात्तत्पदार्थजन्यत्वपुरुषत्वेति शक्यतावच्छेदकद्वयमेव तस्य
सम्यक्। तथा च चैत्रस्य नप्तेत्यादौ चैत्रसंबंधित्वस्य जन्यत्वेऽन्वयः जन्यत्वस्य च पुरुषेऽन्वयः पुरुषस्य जन्यत्वेऽन्वयः जन्यत्वस्य पुरु
पुरुषेऽन्वय इत्येवं रीत्या चैत्रसंबंधिजन्यताश्रयपुरुषजन्यताश्रयः पुरुष इत्यन्वयबोधस्य विनैकदेशान्वयमनुपपत्तौ पदार्थैकदेशा
इत्यतो न संभवेदुक्तिः कथमिति स्थलान्तरे तथाह। पौत्रादन्य इति। अयं भावः। अस्त्वपदमेव तदेव शक्यतावच्छेदकः। न तु भेदाश्रयत्वेनेति रा०
इत्यानात तत्त्वेन पौत्रो न्याय्यः। ननु भवान्नानाएतेनान्वयेदस्यापि खंडशक्तिकल्पनेनिरस्तं। तथा च भेदान्वयदृष्टान्तमपि प्रतियोगिकत्व
स्यान्वयपदार्थैकदेशभेदान्वयो विनैकदेशान्वयस्वीकारमनुपपन्नः। एवं च यत्र पदार्थैकदेशे पदार्थैकदेशस्य पदार्थान्तरेणान्वय
बाधितत्वस्यान्वयोपि तत्पात्रेषु च पदार्थादौ न शोविरोधित्वं प्रतिपत्तिस्थलान्वयबोधोपि। तथा चैतादृशस्थले सर्वत्र स्वस्थलेपि एकदेशा
न्वयस्वीकारे वाधकाभाव इति। ननु गोमान् इत्यादिशक्तिरत्र भवति तदेवानुपपत्तौ पदार्थैकदेशान्वयस्य किंचित्पदा
र्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धिं प्रति मुख्यविशेष्यतासंबंधेन पदजन्यपदार्थोपस्थितेर्हेतुत्वेऽस्याबाधस्य
२४ विरोधित्वं कथमिति लक्षणापदार्थैकदेशानुपपत्तेरन्वयो पदार्थैकदेशान्वयस्य वाधिकपरत्वे ४२४ कर्तयाचैत्रस्य न सत्यादौ तत्पदार्थैकदे:

[redacted]शेनन्यत्वेकथं चैत्रसंबंधित्वस्यान्वय इत्यत आह। तथैवेति। कार्यतावच्छेदकसंबंधविशेष्यतायां नञ्पदार्थान्वयित्वादित्यर्थः। इति तुनिषेधेनैवसं
र्थः। साक्षात्त्वादिति। शाब्दबोधे पदार्थोपस्थितेः कार्यकारणभावस्य कल्पनीयत्वादित्यर्थः। तथा चान्यथानुपपत्त्या गुरुरपि तथैव कार्यकार
॥२१॥ णभावः स्वीक्रियत इति भावः। ननु चैत्रस्य नञ्सादेश्यत्वे नञ्यता अयपुत्रः अन्यत्वं रूपसंबंधः एव यथार्थान्वयः। तस्यैव नञ्पदार्थादेनन्य पुत्रत्व
नन्यपुत्रत्वे अन्वयः। न तु पदार्थैकदेशे अन्यत्वे चैत्रनिरूपितत्वरूपषष्ठ्यर्थसंबंधस्यान्वयः। तथा सत्युपदर्शितकार्यकारणभावेन तस्य
दार्थी घटितत्वे कलत्वस्य विशेष्यतायां निवेशगौरवात्। तथा च नोक्तदृष्टांततानामनवकाश इत्यत आह। अस्तु वेति। कलत्वादिघटितत्वेनेति। स्वा
कृ त्रेलकत्वमत्वादिरूपपरंपरासंबंधेनैवेत्यर्थः। कर्त्रादिना समन्वयः इति। कर्तृप्रत्ययार्थकर्त्रादौ धात्वर्थगमनादिप्रकारकबोधे प्र
कारतावच्छेदकसंबंधं चेदित्यर्थः। तथा च यथा नञ्पदार्थे उपदर्शितपरंपरारूपषष्ठ्यर्थस्यैवान्वयः स्वीक्रियते यथा वा चैत्रादन्य इत्या
दौ स्वाश्रयभेदवत्त्वसंबंधेन भेदविशिष्टे चैत्रप्रतियोगिकत्वस्यान्वयः। न त्वेकदेशान्वयोऽपि तथा गन्तेत्यादावपि कर्त्रादिरूपकृत्प्रत्ययार्थ
एव स्वानुकूलकृतिमत्त्वादिरूपपरंपरासंबंधेन गमनादेरन्वयो न तु पदार्थैकदेशेऽपीति भावः। ननु चैत्रो ग्रामं गन्तेत्यादौ कृत्प्रत्य
येन कर्मादिगतसंख्यानभिधानात् द्वितीयापत्तिरित्यत आह। मुख्येत्यादि। फलादौ स्वादिपदे न विधमत्वादिपरिग्रहः। फलादौ स्वा
दिपदेन वर्तमानत्वादि त्वादिपरिग्रहः। द्वितीयादयः स्यादिना तृतीयापरिग्रहः। अतएवेति। चैत्रेण गन्तव्यो ग्राम इत्यादौ चे
त्यर्थः। विशिष्याभिधानमिति। कर्मत्वादिविशिष्टस्य बोधने इत्यर्थः। विशेषणस्याप्यभिधानादिति। कर्मत्वादेरपि बोधनादित्यर्थः। त राम
धोचकत्वस्यैव न यत्र विशेषणविधया विशेष्यविधया वा कर्मत्वादिकं न बोध्यते तत्र द्वितीयादयः इत्येको नियमः। एवमाख्याते न यत्र ॥२१॥

कर्मत्वादिकं न बोध्यते तत्रापि द्वितीयेत्यपरो नियमः स्वीक्रियते। न तु कर्मादिगतसंख्यानभिधान घटितोऽपि नियम इति नोक्तानुपपत्तिरिति
भावः। कृत्स्वविन्यस्तं दूषयितुं तन्मतमनुवदति। यत्त्वित्यादि। धात्वन्तरप्रत्ययेन कृतौ शक्तिरिति। धात्वन्तरप्रत्ययस्यैव कृतिशक्ततावच्छेदक
मित्यर्थः। तथा च शक्ततावच्छेदकत्वलाघवात् सर्वत्रैकत्वेनैव शक्तिः। न त्वाख्यातस्य कृतौ शक्तिः कृत्प्रत्ययस्य चक्रे तेरि शक्तिरिति तथा सति वि
भिन्नशक्ततावच्छेदकादिकल्पने गौरवादित्यर्थः। ननु कृत्प्रत्ययस्य कृतिशक्तत्वे देवदत्तः पाचक इत्यादौ देवदत्तादिपदार्थे पाचकादिपस्य
कृत्यमभेदान्वयः। तत्र भेदान्वयबोधस्यैवानुभवसिद्धतया प्रकारान्तरस्य वक्तुमशक्यत्वादित्यत आह। पाचकादिपदेष्विति। सामानाधि
करण्यानुरोधात्। अभेदान्वयबोधानुरोधात्। लक्षणेति। तथा च तत्र तत्पदान्वयानुभवस्य कृतः कर्त्तरि लक्षणयैवनिर्वाहिः। अलं तत्र
शक्तिकल्पनयेति भावः। भावस्तोऽपीति। शक्ततावच्छेदकानवच्छिन्नस्य शक्यबोधकत्वनियमादिति भावः। ननु धात्वन्तरप्रत्ययस्य कृतिश
क्ततावच्छेदकत्वेऽपि भावकृतो न कृतिबोधकत्वं तथाविधबोधे भावकृत्पदादिष्याहतान्यपर्यवसितेन विशेषस्यैव नियामकत्वोपगमादित्यत आ
ह। धात्वादीति। घटितेत्यादि। आदिपदात् प्रत्ययत्वपरिग्रहः। तेनाधात्वन्तरप्रत्ययत्वात्। धातुघन्यतमत्वविना धातुत्वस्य प्रकारान्तरेण
निर्वक्तुमशक्यः। एवमाख्यातानाघन्यतमत्वविनाप्रत्ययत्वस्यापीति। तदपेक्षयाल्पत्वादि संबंधेनाख्यातपदवत्त्वरूपाख्यातत्वस्यैव लघो
कृतिशक्ततावच्छेदकत्वौचित्यमिति भावः। एतेनाख्यातमात्रस्य कृतिबोधकत्वे कृतिशक्ततावच्छेदकमाख्यातत्वं एवं कृतिः कृन्मात्र
बोधकत्वे कृत्प्रत्ययत्वं कृच्छक्ततावच्छेदकमिति गौरवमतः एव प्रत्याख्याय तस्यैव धात्वन्तरप्रत्ययत्वस्य कृतिशक्ततावच्छेदकत्वमुचित
मित्यपि निरस्तं। प्रत्ययत्वस्याख्यातत्वकृत्त्वघटिततयैव लाघवानवकाशादिति। कृतौ शक्तिरिति। कृतिविशिष्टे कर्त्तरि कृतः शक्तिकल्पने

अनंतकृतौतच्छक्यतावच्छेदकत्वकल्पनेगौरवं कृतौतत्कल्पनेतु कृतित्वजातेरेवतच्छक्यतावच्छेदकत्वकल्पनेलाघवमितितत्रैवतत्क
॥२२॥ ल्पनमुचितमितिभावः। अनंतदृष्टादिशक्यतासंभवादित्यस्य गवादिपदानांगोत्वविशिष्टशक्तौमित्यनेनान्वयः। ननुगवादिपदस्यगो
त्वविशिष्टेशक्तिकल्पनेगोत्वेपिशक्तिकल्पनस्यावश्यकतयालाघवात्तत्रैवतत्कल्पनमस्त्वित्यतआह। गोत्वेत्यादिना। गोत्वस्य
गवेतरासमवेतत्वेसतिगोनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपतयागौरवादितिभावः। विशिष्टान्तराणामिति शब्दविशि
ष्टमहत्त्वविशिष्टादीनामित्यर्थः। शक्यत्वमिति। आकाशपदस्यमहत्त्वपदादिशक्यत्वमित्यर्थः। तत्रापिशब्दादिविशिष्टेशक्तिकल्पनेअन
न्तशब्दादेःशक्यतावच्छेदकत्वस्वीकारेगौरवं। शब्दादेस्तच्छक्यत्वकल्पनेतुशब्दत्वादिजातेःशक्यतावच्छेदकत्वस्वीकारेलाघवमिति
तत्रापिशब्दादावेवशक्तिकल्पनंस्यादितिभावः। भवतुल्यवदेवेति। कृतेप्रत्ययस्यलोपेऽपिअविशिष्टइत्यर्थः। तथाचयथाशब्दादेराका
शादिपदस्यस्वारसिकप्रयोगाभावात्तत्रतत्रतस्यशक्यत्वंतथाकृतावपिकर्तृविहितकृत्प्रत्ययस्यस्वारसिकप्रयोगाभावात्तत्रापि
नतस्यशक्यत्वमितिभावः। कस्यचिन्मतंदूषयितुंतदुद्भावयति। एवमपिस्वारस्येकेचिदित्यनेन। एवंकर्मविहितकृतःकर्मविहितास्या
तयोःफलबोधकत्वमवस्यापनेनैवस्यार्थःलाघवादिति। फलानुकूलत्वविशिष्टशक्तिकल्पनापेक्षयाशरीरलाघवसंभवादित्यर्थः
अनन्यलभ्यइति। एतेनानन्यलभ्योहिशब्दार्थइतिनियमस्यापिनभंगइतिसूचितं। व्यापारविशेषमात्रमिति। गमनत्वादिविशि
ष्टमात्रमित्यर्थः। अत्रपदेनफलव्यवच्छेदः। इतिस्थितावित्थि इतिस्थितावित्यर्थः। ननुव्यापारमात्रस्यधात्वर्थत्वेग्रामंगच्छतीत्या राम ॥२२॥
दौफलत्वलक्षणकर्मत्वस्यकुतोलाभइत्यतआह। ग्रामंगच्छतीत्यादि। आख्यातार्थकृतेरुदाहरणद्वयंद्वितीयाद्यर्थेति। अन्यादिना

ग्रामस्यगन्तेःस्वादेःधात्वर्थःपरिग्रहः। फलजनकत्वलक्षणमिति। फलत्वमत्रजन्यत्वंतदुद्देश्यः। फलत्वविशिष्टजनकत्वस्येतिद्वितीयाद्यर्थत्वेग्रामं
गच्छतीत्यादौपरसमवेतधात्वर्थजन्यफलशालित्वलक्षणकर्मत्वस्यबोधप्रकारमाह फलेचेत्यादि। चैत्रस्यनसंस्त्वादिवेदकेरणान्वयस्यै
कारेणतथान्वयबोधस्वीकारेतुल्यवित्तिवेद्यतयाऽप्रदर्शितकर्मत्वस्यापिबोधइतिभावः। फलजनकत्वेद्वितीयादेःशक्तिकल्पनेगौर
२ वात्तत्परित्यज्य फलेशक्तिःजनकत्वेतुसंसर्गमर्यादयाभासतइत्यस्यैवसम्यक्त्वात्तथैवाह। फलमात्रंवेति। जन्यत्वविशिष्टेवेत्यर्थः। फल
सामान्यलाभेपीति। जन्यत्वविशिष्टस्यलाभेपीत्यर्थः। नियतेति। लक्षणेऽपास्यतिशक्तिभ्रमकालीनेत्यर्थः। संयोगविभागघटा
भादिति। संयोगत्वविभागत्वादिना संयोगविभागादिरूपफलस्यलाभादित्यर्थः। नस्यादिति। पूर्वमतेउपदर्शितदोषसंभवादित्य
र्थः। फलविशेषावच्छिन्नेति। संयोगत्वादिविशिष्टजनकेत्यर्थः। ननुलक्षणोपस्थितस्यघटाभावकालेतथाविधबोधाभावेक्षतिविर
हइत्यतोदोषान्तरमाह। अन्यथेति। व्यापारमात्रस्यधातुवाच्यत्वइत्यर्थः। पर्यायतापत्तेरिति। एकशक्यतावच्छेदकावच्छिन्नना
नापदस्यैवपर्यायपदार्थत्वादितिभावः। शंकतेतवापीत्यादि। संयोगत्वादिविशिष्टावच्छिन्नव्यापारस्यधातुशक्यत्ववादिनोपी
[illegible]गशालित्वमित्यादि। नन्वत्वरूपफलत्वावच्छिन्नस्यैवकर्मत्वस्याख्यातादिवाच्यत्वेनफलांतरस्यापिबोधसंभवादितिभा
[illegible]योगत्वादिविशिष्टावच्छिन्नेत्यर्थः। तथाचनोक्तदोषसमनियताकारविशेषस्यैवतथाकार्यतावच्छेदकत्वादिति
[illegible]सामान्यधर्मावच्छिन्नबोधकपदस्यविशेषबोधकत्वेदृष्टान्तमाह। यथेत्यादि। अत्यदेतदितितात्प
[illegible]बोधकत्वेतदासामान्यधर्मावच्छिन्नरूपेणसंयोगादिबोधकत्वं। यदिचेत्तत्रेष्टस्वर्गयोरभेदान्वयेनस्वर्ग

द्विलत्वबोधकत्वं तदा प्रकृतेऽपि संयोगादिफलयोर्भेदान्वयेन संयोगादिबोधकत्वमिति भावः। ननु सामान्यधर्मावच्छिन्नबोधक-
॥२३॥ त्वात् सामान्यरूपेण विशेषबोधसंभवेऽपि ग्यतेः नामद्वयोः संयोगत्वादिना संयोगस्य गामवृत्तित्वबोधालाभप्रसंगः। न च संयो-
गत्वतो भेदान्वयेन संयोगत्वरूपेण तथाविधबोधसंभव इति वाच्यं। इतरविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयनिरा-
णेन न तथान्वयासंभवादित्यत आह। अस्तु वेति। तत्त्वाश्रयत्वबुद्धिविशेषविषयत्वरूपसामान्यधर्मावच्छिन्नविशकलितादिप-
दात् घटत्वपटत्वादिरूपविशेषरूपेण बोधः। तथा सकलेऽपि फलत्वरूपसामान्यधर्मावच्छिन्नशक्तात् ख्यात्। तत्तत्संयोगत्वादिरूपविशे-
षरूपेण बोधः। येन धर्मावच्छिन्ने पदनिरूपितशक्तिग्रहः स्तेन रूपेण पदस्य बोधजनकत्वमिति नियमस्य एतदतिरिक्तस्थलत्वा-
दिति भावः। इदं च तदादिसर्वनामपदस्य शक्यतावच्छेदकं बुद्धिविशेषविषयत्वमेव शक्तिग्रहोऽपि तद्धर्मावच्छिन्न एव बोधस्तु च
टोऽस्य बुद्धि स्य इति ज्ञानसहकृतात् बुद्धिविषयस्तदादिपदशक्य इति ज्ञानात् उत्पद्यते इति प्राचीनमतानुसारेण बोध्यं। ननु जाति-
त्वेन घटत्वादिप्रकारकघपदादिपदनिरूपितशक्तिग्रहात् स्वरूपतो घटत्वादिप्रकारकबोधापत्तिवारणाय निरवच्छिन्नप्रकारतास-
बंधेन शाब्दबुद्धिं प्रति निरवच्छिन्नप्रकारतासंबंधेन पदनिरूपितशक्तिज्ञानस्य हेतुत्वकल्पनस्यावश्यकतया कथं फलत्वविशिष्ट-
आख्यातादिपदनिरूपितशक्तिज्ञानात् संयोगत्वादिना शाब्दबोधः। तदा संयोगत्वे उपदर्शितसंबंधेनोपदर्शितकारणविरहात्। न च
विषयभेदेन तादृशकार्यकारणभावकल्पने प्रकृतस्थले सा न कल्प्यत इति वाच्यं। विषयभेदेन कार्यकारणभावकल्पने
गौरवात्। न च तदादिपदात् विशिष्यशाब्दबोधान्यथानुपपत्त्या तथा कल्पनमावश्यकमिति वाच्यं। अनंतकार्यकारणभावकल्प- राम ॥२३॥

नोपपत्त्या तदादिविशिष्यशक्तिकल्पनस्यैवोचितत्वादिति प्रकृतेऽपि विशिष्यशक्तिकल्पनावश्यकीत्यभिप्रायेण प्रकारांतरेण कर्मत्वनिर्व-
चनमुखेन व्यापारमात्रस्य धात्वर्थत्वे दूषणमाह। अपि चेति। धात्वर्थतावच्छेदकफले इति। धात्वर्थतावच्छेदकतावच्छेदकविशिष्टफलेत्यर्थः।
गमियत्योः कर्मत्वस्येति। अत्र च धात्वर्थगमनक्रियाजन्यविभागरूपस्य फलस्य पूर्वदेशे विद्यमानत्वात् गमियत्योः पूर्वदेशस्यापि क-
र्मत्वापत्तिरेवं त्यजिक्रियाजन्यसंयोगरूपफलस्य उत्तरदेशसत्वादुत्तरदेशस्यापि त्यजेः कर्मत्वापत्तिः। तथा स्पंदजन्यविभागादिफ-
लस्य पूर्वापरदेशयोः सत्वात् स्पंदेरनयत्रापि कर्मत्वापत्तिरतो न धात्वर्थजन्यफलशालित्वं कर्मत्वं किंतु धात्वर्थतावच्छेदकफलशा-
लित्वं न तु। तत्र च नोपदर्शितानुपपत्तिः। उत्तरसंयोगरूपफलस्यैव गमधात्वर्थतावच्छेदकतया तस्य च पूर्वदेशेऽभावात्। एवमथः
संयोगस्य पतरवच्छेदकत्वात् तस्य च पूर्वदेशेऽभावात् न गमियत्योः पूर्वदेशे कर्मत्वापत्तिः। एवं विभागस्य त्यजिक्रियावच्छेदकतया
तस्योत्तरदेशेऽभावान्नोत्तरदेशे त्यजेः कर्मत्वापत्तिः। स्पंदेश्चावच्छेदकफलाभावेन नोभयत्र कर्मत्वापत्तिरिति व्यापारमात्रस्य धात्वर्थ-
त्वे ग्रामं गच्छतीत्यादौ कर्मत्वबोधानुपपत्तिरेव दोष इति भावार्थोऽवसेयः। ननु तत्तद्धात्वर्थजन्यतत्तत्फलशालित्वमेव कर्मत्वमित्य-
ननुगतकर्मत्वमस्तु अनुगतकर्मत्वनिर्वचनप्रयोजनाभावादतोऽननुगतकर्मत्वनिर्वचनत्वप्रयोजनमाह। फलावच्छिन्नेति। फलज-
नकेत्यर्थः। सकर्मकत्वव्यवहार इति। तथा चानुगतकर्मत्वनिर्वचनेऽननुगतसकर्मकत्वव्यवहारविलोपप्रसंग इति भावः। ननु एवं स-
ति कथं नानाधात्वर्थसकर्मकत्वव्यवहार इत्यत आह। नामार्थत्वेति। लाक्षणिक इत्यर्थः। तथा चोपदर्शितसकर्मकत्वं मुख्यस्य सक-
र्मकत्वव्यवहारनियामकं विषयत्वादिकं तु गौणसकर्मकत्वव्यवहारनियामकमपि स्यात् तो न दोष इति भावः। ननु अननुगतमेव कर्मत्व-

मस्त्वननुगततया व्यवहारानापत्तेरिष्टापत्तिरित्यत आह। तादृशधात्वर्थयोग एवेति। उपदर्शितसकर्मकधात्वर्थयोग इत्यर्थः। तथा चानुगतकर्म
॥२८॥ त्वनिर्वचने सकर्मकधातुयोगे कर्मप्रत्ययविधानस्याननुगततापत्तेरिति भावः। अत्रेदमवधेयम्। यद्यपि धातुत्वस्य तदर्थतावच्छेद
कस्य चैक्याभावेन धात्वर्थतावच्छेदकफलशालित्वरूपकर्मत्वमपि नानुगतम्। एवं तादृशसकर्मकत्वविरहे पि जानातीत्यादौ यथा त
त्तद्धातुयोगे कर्मप्रत्ययविधानं तथा विशिष्य गम्यादिधातुयोगे पि कर्मप्रत्ययविधानसंभवस्त्वेवं तथा चोक्ततत्तद्धातुजन्यतत्तत्
फलशालित्वरूपाननुगतकर्मत्वनिर्वचने पि न दोषः। कर्मप्रत्ययविधाने ऽनुगतशक्योतरस्य प्रकारान्तरेणापि संभवादिति व्या
पारमात्रस्य धात्वर्थत्वे पि न दोषः। तथापि तन्न उक्तत्वप्रतत्तत्क्रियाजन्यफलशालित्वरूपाननुगतकर्मत्वमुक्तव्यापारमात्रस्य च
धात्वर्थत्वे त्यजिगम्योः पर्यायतापत्तिरित्याद्युक्तदूषणमेवेति। ननु फलावच्छिन्नव्यापारस्य धात्वर्थत्वे ग्रामं गच्छतीत्यादौ ग्रामादि
रूपनामार्थस्य कथमन्वयः। न तावद्धात्वर्थैकदेशे फले धात्वर्थनामार्थयोर्भेदेनान्वयबोधानभ्युपगमादित्यत आह। तत्र चेति॥
ग्रामं गच्छतीत्यादौ चेत्यर्थः। तच्चेति। द्वितीयार्थवृत्तित्वं चेत्यर्थः। आकांक्षादिवैचित्र्यादिति। पदार्थः पदार्थेनान्वेति न तु पदार्थैक
देशेनेति व्युत्पत्तेः संकोचकल्पनादित्यर्थः। तथा च तत्रैव ग्रामादिरूपनामार्थस्यान्वयो न तु धात्वर्थैकदेशे फले इति भावः। नन्वे
ग्रामं गच्छतीत्यादौ धात्वर्थकर्मप्रकारकेत्याधिकरणत्वेनान्वये कर्मणि द्वितीया चेति यत्सूत्रप्रणयनं तदनर्थकं कर्मवास
म्यधिकरणे चेत्यत्र द्वितीयासप्तम्यावधिकरणे चेति करणे नैव निर्वाहादित्यत आह। अत एवेति। धात्वर्थतावच्छेदकफले द्विती राम
यार्थवृत्तित्वस्यानयादेवेत्यर्थः। तथा च सप्तम्यर्थवृत्तित्वस्य धातुशक्तिमुख्यविशेष्ये ऽन्वयः। द्वितीयार्थवृत्तित्वस्य धात्वर्थैक ॥२८॥

देशे फले ऽन्वय इति सूचनार्थं पृथक् सूत्रप्रणयनमिति भावः। नन्वेवं सति पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन तादृशव्युत्पत्तेः
संकोचकल्पने गौरवमित्यत आह। अस्तु वेति। फलमर्थ इति। तथा च फलावच्छिन्नव्यापारस्य धात्वर्थत्वेपि फले द्वितीयार्थः त
च्च न कर्तासंबंधेन धात्वर्थे ऽन्वेति। आधेयत्वं तु द्वितीयार्थकर्मकारकयोः संबंधमर्यादया भासते। तथा च ग्रामं गच्छतीत्यादौ ग्राम
विशिष्टसंयोगविशिष्टसंयोगानुकूलगमनानुकूलकृतिमानित्येवान्वयबोध इति भावः। ननु तथाविधबोधे ग्रामान्वयबोधे संयोगस्य
कारकत्वेनानमनुभवविरुद्धम् इत्यत आह। स्वांशे वेति। नन्वेवं त्यजिगम्योः पर्यायतापत्तिरिति चेन्न। यतः पदशक्यतावच्छेदकतापन्नकर्म
तावच्छेदकतावत्त्वेन तत्र तिङ्क्ततितत्तत्पदानामेव पर्यायत्वादिति भावः। ननु फलव्यापारयोर्धात्वर्थत्वे तत्र तत्र कथं फलजनकव्यापारबोध
निर्वाह बोध इत्यत आह। विशिष्टशक्तिरिति। जनकतासंबंधेन फलविशिष्टव्यापारे शक्तिरित्यर्थः। अन्वये च न लभ्य इति। फलव्यापारयोः पर
स्परमन्वयालब्धमित्यर्थः। तथा च व्युत्पत्तिवैचित्र्यादेकपदार्थयोरपि परस्परमन्वयबोधस्वीकारेण तथाविधबुद्धिविशिष्टेनोपनिर्वाह
इति भावः। ननु धात्वर्थतावच्छेदकफलशालित्वरूपस्य कर्मत्वस्य पले भूमिं प्रयाति विहग इतिवत् स्वलानं प्रयाति विहग इत्यादिप्रयो
गापत्तिः। तत्र संयोगादिरूपफलस्याभिहितत्वात् तयोस्त्वास्वनोधिता दशफलाश्रयत्वसंभवेन स्वालत्वं इति तादृशफलानुकूलव्यापारानु
कूलकृतिमान् विहग इत्युक्तौ दिशाभ्यनोध्यसंभवादित्यत आह। भूमिं प्रयातीत्यादौ। क्रियान्वयीति। एतेन परसमवेतत्वस्य द्वितीया
र्थत्वेपि तस्य फले ऽन्वये संयोगादिरूपतत्फलस्याहितत्वात् स्वलत्त्वं इति तेन तथाविधप्रयोगवारणे सम्भवतीति निरस्तः। ननु पर
समवेतत्वमित्यत्र किं तस्य परत्वं विवक्षितं प्रत्ययेति चेन्नो चैत्रेण स्वागम्यत इति प्रयोगापत्तेः। तत्र प्रकृत धात्वर्थगमनापेक्ष

यात्मनः परत्वादित्यत आह। द्वयोस्त्विति। विशेषमेव स्फुटयति। यत्परत्वमित्यादिना। तिङादीत्यादिना कर्मकर्तृत्वपरिग्रहः। स्वा
॥२५॥ र्थ इति। स्वार्थो यत्फलं तदाश्रयत्वं प्रत्ययार्थः। इदं च फलावच्छिन्नव्यापारादेर्धात्वर्थत्वपक्षे तु आख्यातार्थाश्रयत्वे धात्वर्थकतया स्वा
र्थाश्रयता। आश्रयेत्याश्रये स्वार्थेऽन्वय इत्यर्थः। तथा च ग्रामं गच्छतीत्यादौ ग्रामान्यवृत्तित्वे ग्रामवृत्तिसंयोगानुकूलस्पन्दस्तदनुकूलकृति
मानित्येवान्वयबोधः। एवं प्रयोगस्य तदित्यादौ ग्रामान्यवृत्तिर्ग्रामवृत्तिसंयोगानुकूलस्पन्दस्तत्फलवांस्तदाश्रयतावान्
वा ग्राम इत्यन्वयबोध इति भावः। ननु समवेतो द्वितीयासमभिव्याहारस्थले फलादेर्धात्वर्थत्वे चैत्रो जानातीत्यादिप्रयोगानुपपत्तिः। द्वि
तीयान्तस्य फलस्य धात्वर्थवृत्तित्वेन तत्र तदन्तर्भावेनान्वयबोधासंभवात्। एवं सर्वत्र परसमवेतत्वं कर्मप्रत्ययार्थ इत्यप्यसङ्गतम्। आ
त्मा आत्मानं जानातीति प्रयोगानुपपत्तेः। आत्मान्यवृत्तित्वस्य ज्ञानादावप्रसिद्ध्या तस्य तत्रान्वयबोधासंभवादित्यत आह। चैत्रं जा
नातीत्यादौ विषयित्वमिति तु कर्तृतिङादिस्थले द्वितीयार्थस्तमिनायेण विषयत्वमिति मैत्रेत्युक्तम्। व्याख्यातस्थले आख्यातार्थाभिप्रा
येण कर्तृत्वं तृतीयायां स्वरूपकर्माख्यातस्थले इत्यादि। तथा च सविषयकार्थबोधकधातुसमभिव्याहृतद्वितीयासमभिव्याहृतथा
तुस्थले फलादेर्धात्वर्थनियमः। एवं तादृशधातुस्थले कर्मप्रत्ययस्य परसमवेतत्वमर्थो नान्यत्रेति भावः। तथा सति तत्र तत्रान्व
यबोधप्रकारमाह। अन्वयबोधे त्विति। एकत्रेति। कर्तर्याख्यातस्थले इत्यर्थः। अन्यत्रेति। कर्माख्यातस्थले इत्यर्थः। ननु विषय
त्वादेः कर्मप्रत्ययार्थत्वे ज्ञातो घट इत्यत्र विषयत्वस्य घटादौ भेदेनान्वयबोधासंभवः। नामार्थयोर्भेदेनान्वयबोधानंगीकारात्। नवा राम
अभेदेनान्वयबोधः बाधादित्यत आह। ज्ञात इत्यादि। तथा चाख्यातस्थले कर्मप्रत्ययस्य विषयत्वादिकमर्थः। कर्मणि क्तप्रत्ययस्य तु वि ॥२५॥

षयत्वादिकमर्थः। तस्य च प्रथमान्तार्थेऽभेदेनान्वयः। नामार्थयोरभेदेनान्वयबोधस्य सर्वसंमतत्वादिति भावः। ननु सर्वत्र सविषय:
क धात्वर्थे विषयितया द्वितीयार्थस्यान्वयांगीकारे अनुजानेऽपि भोजनाय यतत इति प्रयोगानुपपत्तिः। तदा तत्र भोजनविषयकत्व
स्याभावादित्यत आह। यत्न इत्यादि। तथा च यतिपदार्थातिरिक्तसविषयकधात्वर्थे सर्वत्र विषयितैवेतरपदार्थान्वयो अत्र तु उद्देश्य
त्वेनेति भावः। एतत् एवेति। यतो यतिपदार्थे उद्देश्यत्वेनेतरपदार्थान्वयो न तु विषयित्वेन अत एवेत्यर्थः। अनुजानेऽपीत्यादि।
अन्यथा तत्र तदा भोजनविषयकत्वाभावेन तथा प्रयोगानुपपत्तिरिति भावः। मंडनमतं दूषयितुं तन्मतमुपदर्शयति। धातोर
र्थः फलमिति। तथा च फलानुकूलव्यापारे धातोः शक्तिवादिनोऽपि फले शक्तिकल्पनस्यावश्यकत्वे यात् तत्रैव न तत्कल्पनमुचितमिति भाव
ननु एवमपि गच्छतीत्यादौ संयोगरूपफलानुकूलव्यापारबोधस्यानुभवसिद्धस्य कथं निर्वाह इत्यत आह। अनुकूलव्यापार इति। पद
र्थैकदेशेऽन्वयांगीकारादाह। व्यापारमात्रं वेति। ननु केवलव्यापारस्याख्यातार्थत्वे गच्छतीत्यादौ धात्वर्थसंयोगाख्यातार्थव्यापारयोः क
- र्यजन्यजनकभाववत्ता न स्यादत आह। जन्यजनकभाव इत्यादि। ननु सर्वत्र फलस्य धात्वर्थत्वे गच्छति यजते इत्यादौ संयोगस्वर्गादिरूपफलेन व
र्तमानत्वे प्रसाधनत्वादेरन्वयबोधेऽन्वयानुपपत्तिरत आह। लडादीत्यादि। लडादिघटकवर्तमानत्वादिकं लिङादिघटकं इष्टसाधनत्वादिकमि
त्यर्थः। वर्तमानत्वादीत्यादिना। भविष्यत्वादिपरिग्रहः। इष्टसाधनत्वादीत्यादिना कृतिसाध्यत्वपरिग्रहः। एकपदोपात्तत्वेति। एकपद
जन्योपस्थितिविषयत्वमित्यर्थः। तत्रैवेति। व्यापार एवेत्यर्थः। तथा चाख्यातार्थव्यापारे वर्तमानत्वादेरन्वयांगीकारे आसत्त्यर्थः वर्तमा
नत्वादेरुपस्थितेन ताकल्पनेन लाघवमिति भावः। ननु फलस्याधात्वर्थत्वे ओदनादिरूपपाककफलानुकूलत्वं तिरश्या तदनुकूलपाको

श्री दिरूपव्यापारसत्त्वे पाको भविष्यतीति प्रयोगापत्तिः। न च निरर्थकघञ्समभिव्याहृतपचधात्वर्थस्यौदनादिरूपफलस्य वर्तमानप्रागभावप्रतियोगित्व
।१२८। रूपभविष्यत्वस्य सत्त्वादिष्टापत्तिरित्यत आह। भावप्रत्ययस्य घञादेरिति। भावविहितस्य घञादेः प्रत्ययस्येत्यर्थः। अनुकूलव्यापार इति। तथा च तत्र भावविहित
प्रत्ययार्थतादृशव्यापारस्य सिद्धतया तत्र वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्वस्य बाधितत्वेन तथा प्रयोगापा। एवं त्यसंभवादिति भावः।
तेनेति। भावविहितघञ्प्रत्ययस्यानुकूलव्यापारार्थकत्वेनेत्यर्थः। फलानुत्पाददशायामिति। ओदनादिरूपफलानुत्पाददशायामित्यर्थः। ताद
शफलोत्पाददशायां तु तत्र वर्तमानप्रागभावप्रतियोगित्वरूपभविष्यत्वस्यौदनादिरूपफले सत्त्वेन तथा प्रयोगस्येष्टत्वादिति भावः। कृत्स्नमिति। घञ्
ओऽनुकूलव्यापारार्थकत्वे युक्त्यन्तरमाह नचेति। व्यापारविगमे पाकादिरूपव्यापारविगमे इत्यर्थः। पाको निवृत्त इति। अत्र तदा धात्वर्थस्यौद
दिरूपफले वर्तमानकालसंबंधित्वरूपविद्यमानत्वसत्त्वेन तथा प्रयोगापत्तिः स्यादिति भावः। भावविहितघञादीनामित्यत्रादिपदग्राह्यमाह ल्युड्
प्रत्ययस्य व्यापारार्थकत्वे युक्तिमाह। नापीत्यादि। अत्र भावल्युट्प्रत्ययस्य निरर्थकत्वे संयोगरूपफलमात्रस्य गमधात्वर्थत्वेन तस्य च घटे सम
वेतत्वान्मयवृत्तितया घटेऽमेतलेयोगि प्रयोगमिति प्रयोगापत्तिर्दुर्वारैवेति तस्य व्यापारार्थकत्वमावश्यकमिति भावः। ननु चैतन्मैत्रेकर्तृकत्वेन धात्व
र्थतावच्छेदकफलशालित्वफलस्यैतन्मैत्रे धात्वर्थतयाप्यधात्वर्थतावच्छेदकत्वाभावेन तथा प्रयोगस्यासंभवदुक्तिकत्वात्। नापि परमात्र समवेत
व्यापारजन्यधात्वर्थफलशालित्वात् स्वात्मानं प्रयातीति विहग इति प्रयोगापत्तेः। विहगस्य स्वपरोभयः स्वावयवः। तत्तत्समवेतो यः स्वोत्क्रमव्यापारस्त
ज्जन्यधात्वर्थसंयोगाख्यफलशालित्वादित्यत आह। प्रत्ययोपनीतेति। प्रत्ययप्रतीतो यः परसमवेतव्यापारस्तज्जन्यं यत्तद्धात्वर्थफलं तच्छा राम
लित्वमेतन्मैत्रेकर्मत्वमित्यर्थः। तथा विधस्वोत्क्रमव्यापारस्य प्रत्ययोपनीतत्वाभावेन स्वात्मानं प्रयाति विहग इति प्रत्ययप्रसंगः। नचात्मन ।१२८।

पारपदं व्यर्थमिति वाच्यं। व्यापारत्वेन प्रत्ययोपनीतत्वमात्रस्यैव तस्योपादाने। अन्यथा वर्तमानत्वादिना प्रत्ययोपनीतो यः परसमवेतकालोपाधिस्तज्जन्य
धात्वर्थफलशालित्वेन चालनोऽपि कर्मत्वसंभवेन स्वात्मानं प्रयाति विहग इति प्रतीत्यापत्तेः। न च तथापि धात्वर्थेति व्यर्थं गच्छति स्वादौ एवं दशस्यापि कर्म
तापत्तिः। तस्यापि प्रत्ययोपनीतो यः परसमवेतव्यापारस्तज्जन्यफलं विभागः तच्छालित्वात्। तदुपादाने च न तथापत्तिः। तस्य धात्वर्थत्वाभावात्। अ
त्र परसमवेतत्वं कर्मप्रत्ययार्थः। तस्य च कर्तर्याख्यातस्थले आख्यातार्थव्यापारे कर्मण्याख्यातस्थले च निरूपमते लृतीयार्थव्यापार एव बोधेऽन्वय इति पर
त्वं धात्वर्थ आधेयता संबंधेनान्वेतीति तद्विषये या धात्वर्थोऽधिकरणसंबंधेनायमत्रान्वेति तदपेक्षया च बोध्यं। इत्थं च ग्रामं गच्छति स्वादौ ग्रामवृत्ति
संयोगजनकक्रियानाभिन्नसमवेतव्यापारवांश्चैत्रः चैत्रेण ग्रामो गम्यते इत्यत्र चैत्रवृत्तिर्या ग्रामभिन्नसमवेतव्यापारजन्यसंयोगशाली ग्राम इ
ति बोधः। ननु कर्तृख्याते कर्माख्याते तयोर्व्यापारत्वेन कर्तृरूपधर्मावच्छिन्नत्वे बोध्यकत्वेन धर्मेकत्र कर्तृप्रत्ययः कर्मप्रत्यय इति व्यवहारोऽत आह।।
फलव्यापारयोरिति। तथा च फलस्य विशेषणत्वे व्यापारस्य विशेष्यत्वे कर्तृप्रत्यय इति व्यवहारः एवं फलस्य विशेष्यत्वे व्यापारस्य विशेषणत्वे
त्वेन च कर्मप्रत्यय इति व्यवहार इति भावः। नन्वेवं कर्माख्यातस्थले धात्वर्थफलस्य साक्षान्नामार्थेऽन्वयबोधांगीकारे नामार्थधात्वर्थयोः सा
क्षाद्भेदान्वयबोधो नांगीक्रियत इति व्युत्पत्तिभंगप्रसंग इत्यत आह। वस्तुतस्त्विति। अधिकरणत्वमित्यादिग्रन्थमात्रदूषणस्य एवं कर्म
त्वेदमनेनान्वयः। ननु कर्माख्यातवत् कर्मकृतोऽप्यत्र यथा बोध्यकत्वेन तस्य नामार्थेऽन्वयप्रसंगः। नामार्थयोर्भेदेनान्वयबोधस्यानंगीकारा
दित्यत आह। कर्मकृत इति। आश्रय इति। फलस्येत्यादिः। कर्तृकृता यत्नोऽऽश्रयबोध्यकत्वे एकाकारबोधजनकत्वरूपतौल्यभावः स्यात् तस्यापि यल
त्वविशिष्टकृतापत्तिरित्यत आह। कर्तृकृतेति। कर्तृकर्मसाधारणेत्यद्दर्शितोभयस्थले कर्तृकर्मणोः सहतोः प्रत्ययार्थभेदान्वयबोधे

न्या·वी· स्यानुभवसिद्धस्यानुरोधादित्यर्थः। जानात्यादि योगइति। आख्यातकर्मकर्तृकत्वमिति शेषः। पूर्वोक्तैवरीतिरिति। अथ यत्र द्वित्वविषयत्वेन कर्माख्या

॥२७॥ तकर्माख्यातयोः आश्रमविषयो च कस्येत्युक्तकर्मकृतो रथं इत्यर्थः। सुवर्णएवेत्यादि। पच्यत इत्यत्र व्यापारस्यापि आख्यातार्थत्वाभ्युपगमात्। फल

वर्त्तमानतान्वयतो धात्वर्थकारकव्यापाराः सन्तु तदृशायामपि पच्यत इत्यादिप्रयोगापत्तिः। एवं पक्वदशायां आख्यातस्याभावेन तदर्थव्यापार

५५ अतीतत्वस्य बोधइतिन क्रमशः कत्वेन धात्वर्थफलेऽतीतत्वस्यान्वयांगीकारे फलस्य तदृशायां व्यापारानाशदशायां पक्वस्तण्डुल इति प्रयोगानु

पपत्तिश्चेति भावः। वर्त्तमानत्वादीत्यादिना। अतीतत्वादिपरिग्रहः। ननु पच्यमानइत्यादौ शानच्प्रत्ययार्थकर्तृद्वारा व्यापारे एव तदर्थवर्त्तमान

त्वादेरन्वयः स्वीकर्त्तव्यः। तथा च पदार्थः पदार्थेनान्वेतीति नतु पदार्थैकदेशेनेति व्युत्पत्तेः संकोच इत्यत आह। पच्यमानइत्यादि। तथा च प्रकृतस्य

लेनादृशव्युत्पत्तेः संकोचः कल्प्यत इति भावः। सर्वत्र तादृशव्युत्पत्तिस्वीकारे तत्राह। स्तोकेति। नन्वेवं सति तत्र व्यापारान्वयनायोग्यत्वाच्च स्यानु

भवसिद्धस्यालोपप्रसंग इत्यत आह। विशिष्टमिति। आश्रयतासंबंधेन व्यापारे विशिष्टमाश्रयत्वमित्यर्थः। अन्वयबललभ्यमिति। एकप

दोपस्थाप्यत्वयोरर्थयोः परस्परमन्वयबोधांगीकारेणाकांक्षाकार्यकारणभावसिद्धशाब्दबोधविषयइत्यर्थः। तथात्वे कपदोपस्थाप्यपयोः

योः परस्परमन्वयबोधे बाधकाभावेन तादृशविशिष्टार्थबोधो नानुपपन्न इति भावः। नन्वेकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधा

नुत्पत्तिसिद्ध इत्यत आह। एवकारस्येति। तथा चैकपदोपस्थाप्ययोरर्थयोः परस्परमन्वयबोधानंगीकारेऽपार्थ एवकारानु

पर्यवसानादेः पार्थान्ययोगव्यवच्छेदबोधोऽनुपपन्नः। एवकारस्यापि अन्ययोगव्यवच्छेदच प्रत्येकं शक्तिद्वयस्वीकारे ऽनुपदर्शितानुपपत्तिरप्र   राम ॥२७॥

सक्ता इति भावः। ननु एवकारस्य उभयशक्तिर्न स्वीक्रियते किंत्वन्ययोगप्रतियोगिकत्वविशिष्टव्यवच्छेद एव। तथा च नोपदर्शितान्वयबोधोऽनु

पपन्न इत्यत आह। अन्ययोगेत्यादि। अन्ययोगप्रतियोगिकत्वविशिष्टव्यवच्छेदमात्रस्यैवार्थः। अतिप्रसक्तत्वादिति। सर्वसाधारणत्वादित्यर्थः। तथा च पार्थ

एवधनुर्धरइत्यादिवत् चैत्रएवधनुर्धरइत्यादिप्रयोगापत्तेः। चैत्रान्ययोगघटाभाववव्यवच्छेदस्य चैत्रान्ययोगप्रतियोगिकस्य धनुर्धरे विद्यमानत्वादिति

भावः। नन्वन्ययोगत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदकत्वमेवैवकारशक्यः। तथा च न चैत्रएवधनुर्धरइत्यादिप्रयोगः पार्थरूपधनुर्धरे चैत्रान्य

योगस्यापि सत्त्वेन तथा धनुर्धरत्वावच्छेदेन चैत्रान्ययोगत्वावच्छिन्नाभावासत्त्वात् अत आह। अन्ययोगत्वावच्छिन्नेत्यादि। अन्ययो

गत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य शक्यत्वे अन्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य शक्यत्वे शक्याप्रसिद्धिः। पार्थएव ध

नुर्धरइत्यादौ अन्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकाभावरूपशक्याप्रसिद्धिः। पृथिव्यामेव गन्ध इत्यादौ अन्यसमवेतत्वावच्छिन्नाभा

वरूपशक्याप्रसिद्धिदोषोनसंभवति। अप्रसिद्धेनानासमवायप्रसिद्धिसंभवादित्यत आह। बाधितत्वे चेति। पृथिव्यामेव गन्धइत्यादौ गन्धे

अन्यसमवेतत्वानस्यबाधितत्वे चेत्यर्थः। ननु तत्र गन्धेऽन्यसमवेतत्वव्यवच्छेदस्य बाधितत्वेऽपि पृथिव्यन्यसमवेतत्वाभावस्य तत्राबाधितत्वेन तत्रान्वयसं

भवात्। एवं पार्थएवधनुर्धरइत्यादौ अन्यतादात्म्याप्रसिद्धावपि पार्थान्यतादात्म्याभावस्य प्रसिद्धिसंभवेन बाधसंभवात् इत्यत आह। पार्थएवे

त्यादाविति। तस्य पार्थान्यतादात्म्यत्वावच्छिन्नप्रतियोगिताकव्यवच्छेदस्य तत्तोऽन्यत्वात्। एवकारशक्यतावच्छेदकावच्छिन्नभिन्नत्वात्। शक्य

तावच्छेदकावच्छिन्नस्यैवपदार्थस्योपस्थितिसंभवेन एवकारात्तदर्थान्यतादात्म्यव्यवच्छेदस्यापस्त्यसंभव इति भावः। ननु स्वान्यतादात्म्यत्वावच्छिन्न

भा·वा· प्रतियोगिताकोऽपि एवकारस्य शक्तिः। कल्प्यतां यावत्स्वपदं यत्पदसमभिव्याहृतः तद्भिन्नत्वं समभिव्याहृत एवकारः अतस्तत्रैतथाप्यनोपदर्शितानु

नुपपत्तिरत आह। स्वान्येत्यादि। स्वत्वस्यानुगमात् पार्थपृथिव्यादिसाधारणानुगतस्वत्वस्याभावात् पार्थान्यव्यवच्छेदाद्यबोधेन एवकारस्य न।

का॰ दी॰ नानाशक्तिकल्पने शक्त्यानन्त्यं तथा चानन्तशक्तिकल्पनभिया पूर्वप्रदर्शितप्रकारोऽनादरणीय इति भावः। नन्वेवकारः स्वान्यप्रतियोगिकव्यवच्छेदबोधनाना
॥२८॥ शक्तिवादिमते कथं पदार्थ एव चतुर्थ इत्यादौ पार्थान्यतादात्म्यव्यवच्छेदबोध इत्यत आह। नकारादित्यादि। यथा नीलो घटो नास्तीत्यादौ घटत्वानवच्छि
न्नो नीलस्यान्वयेन नीलघटत्वावच्छिन्नाभावः प्रतीयते तथा पार्थ एवेत्यादौ एवकारार्थे अन्ययोगव्यवच्छेदे पार्थस्यान्वयेनान्यस्य च योगाभावस्य व
नयोगस्य च व्यवच्छेदे अन्वये न पार्थान्यतादात्म्यव्यवच्छेदः प्रतीयत इति समुदितार्थः। ननु कर्तृत्वादर्थव्यापाराश्रयैकदेशे व्यापारे वर्तमा
नत्वा धनपस्तीकारे सेडनमनतपदार्थः पदार्थेनान्वेति न तु पदार्थैकदेश इति व्युत्पत्तिसंकोच एवं दोषः व्यापाराश्रययोस्तस्य नानाशक्यत्वे चा
नेन शक्तिकल्पनप्रसंग इत्यत आह। समानेनेति। तथा चाख्यातस्य कृतित्वेन कृतौ शक्तिवादिना विभक्तेः कर्तृत्वे कृत्याश्रयैकदेशे कृतौ चैत्रेण
न चाद्रन्वयाभ्युपगमे पदार्थैकदेश इति व्युत्पत्तिभंगः कर्तृकृतेः कृतौ आश्रये च शक्तिरूपस्वीकारेऽनेन शक्तिकल्पनाप्रसंगोऽवश्यमभ्युपगन्तव्य इति मतद्वयमविशि
ष्टमिति भावः। नन्वाख्यातकर्तृकृतौ व्यापारतदाश्रययोः शक्यत्वे संयुज्यते संयुक्तद्रव्यादावपि तथैव वक्तव्यं तथा च धातोः सकर्मकत्वापत्तिः प्रत्यय
पनीतव्यापारानुकूलव्यापारजन्यफलशालित्वरूपकर्मत्वस्य तत्र सत्त्वादित्यत आह। धात्वर्थेत्यादि। तथा च तत्र प्रत्ययोपनीतव्यापारार्थ
त्वेन भाविवस्तुव्यापारविरहितस्य तादृशप्रत्ययानुपपत्तेरिति भावः। ननु संयुक्तद्रव्यादावपि संयोगादिरूपव्यापारस्य तादृशप्रत्ययेसत्त्वेन तत्र
तथाविधव्यापारविरह एवाप्रसिद्ध इति संयुज्यते इत्यादौ प्रत्ययस्य व्यापारार्थकत्वेनोक्तानुपपत्तिरतादवस्थ्यमित्यत आह। संयोगमात्रप्रतीतत्वेति। भा
व्यापारव्यवच्छेदे तथा च तथासति तत्र व्यापारस्यापि बोधः स्यादिति भावः। नैसकर्मकत्वमिति। व्यापारस्य प्रत्ययोपनीतत्वाभावेन प्रत्ययोपनी राम
तव्यापारजन्यफलशालित्वरूपकर्मत्वस्य तत्राभावान्न सकर्मकत्वमिति भावः। ननु घटो व्यापारार्थकत्वे नावेघटिज्यनुपपत्तिरिति चेत् ॥२८॥